काङ्क्षया सह एते स्त्रीलिङ्गा भवन्ति[77] । द्राक्षा मृद्वीका । लक्षा सहस्राणां[78] शतम्[78] । लाक्षा रागद्रव्यविशेषः[79] । लिक्षा क्षुद्रजन्तुविशेषः । कक्षा कायैकदेशः प्रकोष्ठः[80] करिमध्यरज्जुश्च[81] । काङ्क्षा[82] वाञ्छा[82] । स्वाहा अग्निपत्नी । काञ्चिः रशना[83] । वीचिः कल्लोलः । सूचिर्भेदिनी[84] । मारिः मरकम्[85] । भेरी वाद्यविशेषः । हरिद्रा रागद्रव्यविशेषः[86] । आरा चर्मवेधिनी[87] ॥ १९ ॥

द्युतिपल्लितूलिलिपिलिविरुचिकृपिकिखि[88] कीलिनालि[98] भिश्चूर्णिः ।
सरणिग्रहणिरितीदूदन्तं चावीचमूप्रभृति ॥२०॥

द्युत्यादिभिः सह[89] एते[90] शब्दाः[91] स्त्रीलिङ्गा भवन्ति[92] । द्युतिर्दीप्तिः । पल्लिः[93] भिल्लादिनिवासविशेषः[94] । तूलिः शय्याविशेषः चित्रकूर्चिका च । लिपिर्लिविश्च अक्षरपद्धतिः[95] । रुचिर्दीप्तिः अभिलाषश्च । कृपिः छेदोपकरणविशेषः[96] । किखिः कालगोत्रविशेषः[97] । कीलिः कीलिका । नालिः[98] कन्दली तृणविशेषश्च । चूर्णिः ग्रन्थविशेषः[99] । सरणिः[200] मार्गः । ग्रहणिः रोगविशेषः[1] । इतिशब्दः अत्र[2] आकृतिगणार्थः । तेन[3] विटिः हालिः[4] मूलिः[5] कूलिः सृणिः[6] सूणिः[7] । अवीचमूप्रभृति । ईत्[8] ईकारान्तं अव्यादि[9] यत्[10] [ऊत्] ऊकारान्तं चम्वादि[11] यत् । अवीः

69 G वृषभादौ. 70 B वृषभशब्दस्य. 71 B वशा. 72 BD नाशा. 73 G पुत्रवधूः । 74 D सक्थि । 75 D विवरविशेष:76 D कक्षया, D_1 कक्ष्यया. 77 Om G. 78 G सहस्रशतम् । 79 G रागद्रव्यम् । 80 BD प्रकोष्ठविशेषः । 81 Om G. 82 Om BD. 83 GD रसना । 84 G भेदनी explained in margin by सोइ. 85 B मारकं, G मकरः । 86 B रञ्जनद्रव्य° । 87 BD चर्मकारभाण्डविशेषः । 88 G किषि. 89, 90 Om GD. 91 Om B. 92 Om G. 93 G adds गृहगोधिका. 94 B शबरालयः, D भिल्लादेः आवास° । 95 G लेख्यविशेषः, D लेखवि° । 96 B वेदोपक°, D क्षेत्रोपक° वेदोपक° । 97 B नालमूलविशेषः, D adds शृगालविशेषश्च । 98 B नाडिः । 99 GD ग्रन्थिवि° । 200 to 1 Om B. 2 Om GB 3 Om B. 4 Om BD. 5 Om B. 6 Om D. 7 Om G; G adds शीलिः सुगतिः; B adds चूलिः. D adds स्थूलिः । 8 Om D. 9 B मध्यादि, D मह्यादि. 10 B यावत् । 11 D वध्वादिवत् ।

तरीः तन्त्रीः लक्ष्मीः इत्यादयः। चमूः वधूः जम्बूः दम्भूः[12] दिधिषूः[13] कर्कन्धूः अलाबूः कसेरूः[14] कच्छूः[15] इत्यादयः[16] । आकृतिगणश्चायम् ॥ २० ॥

एकस्वरमीदूदन्तं शाटिर्भाविसूचितः ताश्च[18] ।
स्रक् स्रुक्[31] स्फिक् त्वक् वाक् संविदुपानद्गीर्दृषद्धूः पूः ॥२१॥

एकः स्वरः यस्य तदेकस्वरं ईदूदन्तं[19] ईकारान्तमूकारान्तं च[20] शाट्यादयश्च स्त्रीलिङ्गा भवन्ति । एकस्वरं [ईकारान्तं] यथा । श्रीः धीः भीः[21] ह्रीः इत्यादयः । ऊकारान्तं यथा भ्रूः[22] सूः द्रूः[23] जूः इत्यादयः । शाटिः[17] प्रावरणविशेषः । भावसूचितः ताश्चेति । "तत्वौ भावे"[24] [कातन्त्र २.६.१३] भावेन सूचितः[25] उपलक्षितः यः ताप्रत्ययः[26] इति । पुरुषस्य भावः पुरुषता[27] । जडस्य भावः[28] कर्म वा[28] जडता । ग्रामाणां समूहो ग्रामता । एवं जनता राजता[29] बन्धुता सहायता[30] । देव एव देवता । स्रक् माला । स्रुक्[31] यज्ञभाण्डविशेषः । स्फिक् पुन्दः[32] । त्वक् शरीरच्छविः । वाक् वाणी । संवित्[33] संवेदनम्[34] । उपानत् चर्मपादुका । गीः वाक् । दृषत् शिला । धूः धुरा[35] । पूः पुरी ॥ २१ ॥

प्राण्यङ्गमिदन्तं विप्रुट्छर्दिःशरत्समिद्द्युसुमनर्चः ।
स्यूर्भूर्विद्युद्वल्लीनिशाङ्गनादिग्नदीनाम ॥२२॥

प्राणिनामङ्गं प्राण्यङ्गम् । इत् अन्ते[36] यस्य तदिदन्तं प्राण्यङ्गम्[37] । विप्रुट् च छर्दिश्च शरच्च समिच्च द्यौश्च सुमनाश्च ऋक् चेति । एते स्त्रीलिङ्गाः स्युः[38] भवन्ति[39] । विप्रुडादयश्च[40] भूश्च विद्युच्च वल्ली च निशा च अङ्गना च दिक् च नदी च आसां[41] नाम संज्ञाः च[42] स्त्रीलिङ्गाः स्युः[43] । प्राण्यङ्गमिदन्तं[44] यथा । नाभिः[45] श्रोणिः अङ्गुलिः अरत्निः[46] पार्ष्णिरित्येवमादयः[47] । पाणिशब्दस्य तु भुजपर्यायत्वात्परा[48] पुंलिङ्गसंज्ञा[49] । तथा अङ्घ्रिशब्दस्यापि इति[50] । विप्रुट् बिन्दुः । छर्दिर्वान्तिः । शरद्

12 Om B. 13 BD दिधीषूः, G दधिष्णूः । 14 D adds ष [ख ?] रसूत्रम् ।15 GB कबूः । 16 D adds कओ [औ ?] अचि । 17 GD सा° । 18 GD तस्य, BD¹ तश्च । 19 Om BD. 20 Om G. 21 Om GD. 22 G भूः । 23 G प्रूः सूः क्नूः । 24 G तात्वे भावे । D तत्त्वौ । 25 Om G. 26 BD सूप्रत्ययः । 27 B पुरुषस्य वा स्यात् प्रभृतिभिः यावत् पुरुषता । 28 Om BD. 29 Om B. 30 B सहत्ता, जगत्ता (गजता ?). 31 G श्रुक् 32 B शरीरावयवविशेषः, D adds गुल्फः। 33 D संचित् । 34 G संवेदना. 35 B धूरी. 36 D अन्तो. 37 Om D. 38 Om B. 39 Om D. 40 Om BD. 41 Om B. 42 Om GB. 43 D भवन्ति । 44 BD इकारान्तं । 45 G मौलिः । 45 B रत्निः (?) 47 G इत्यादयः । 48,49 परत्वेन पुंलिङ्गत्वम् ।

ऋतुविशेषः[51] । समित् याज्ञिकप्रसिद्धं[52] प्रादेशमात्रं काष्ठम् । द्यौः स्वर्गः आकाशं[53] च[54] । सुमनाः पुष्पम्[55] । शोभनं मनो यस्येति बहुव्रीहिणा[56] तु वाच्यलिङ्गता । ऋक् वेदमन्त्रविशेषः[57] । भूनाम[58]—भूः भूमिः क्षितिरित्यादयः[59] । विद्युन्नाम[60]—विद्युत् तडित् अचिराभेत्यादि । वल्लीनाम—वल्ली लता व्रततिरित्यादि । निशानाम—निशा क्षपा[61] रात्रिरित्यादि । अङ्गनानाम—अङ्गना योषित् वनितेत्यादि[62] । दिग्नाम—दिक् ककुप् काष्ठेत्यादि । नदीनाम—नदी सरित् धुनीत्यादि । अत्र कस्यचिद् अम्भः[63]—शब्दादेः नद्यादिनाम्नोऽपि असन्तत्वात्[64] नपुंसकत्वं एव[65] परत्वेन । क्वचित्[66] "**पूर्वपरयोः[67] परो[68] विधिः बलीयान्**"[69] इति । परस्येष्टवाचित्वात् । यथा कोः उषसश्च उदन्तस्य असन्तस्य च भूनाम्नो[70] अङ्गनानाम्नश्च स्त्रीत्वं सिद्धम्[71] ॥ २२ ॥

सम्पत् प्रतिपद् विपदापत् संसत् समिदपि[72] क्षुधा परिषत् ।
गायत्र्याद्याः क्यब्भावे प्रावृड्दर्विमुद्भासः ॥२३॥

क्षुधा[72] सह[73] एते स्त्रीलिङ्गा भवन्ति[74] । सम्पत् सम्पत्तिः । प्रतिपत् तिथिविशेषः[75] । विपद् विपत्तिः । आपद् आपत्तिः[76] । संसत्[77] सभा । समित् सङ्ग्रामः । क्षुत्[78] बुभुक्षा । परिषत् सभा । गायत्री आद्या यासामिति गायत्र्याद्याः[79] । गायत्री उष्णिग् अनुष्टुप् बृहती पङ्क्तिः त्रिष्टुप् जगती[80] अतिजगती[81] शक्वरी अतिशक्वरी अष्टिः[82] अत्यष्टिः[83] धृतिः अतिधृतिः[84]—एताश्छन्दोजातयः । भाव एव यः क्यप् तस्य ग्रहणम् । यस्तु "भावकर्मणोः कृत्यक्तखलर्थाः" [कातन्त्र ४.६.४७] इत्यनेन[85] विहितो न तस्य ग्रहणम् । यथा "नाम्नि वदः क्यप् च" [कातन्त्र ४.२.२०] इति[86] । नापि[87] "भावे भुवः" [कातन्त्र ४.२.२१] इत्यस्य अव्यभि-

---

50 Om G. 51 B adds वर्षश्च । 52 B याज्ञिकवस्तुविशेषं प्रसिद्धं° । 53 G आकाशः । 54 Om BD. 55 B adds देवाभिधानं (?) च । 56 B विग्रहबहुव्रीहिणा. 57 B देवमन्त्र° । 58 B भूमिनाम. 59 G इत्यादि, D इति. 60 From विद्युन्नाम to अङ्गनानाम there is a lacuna in G. 61 B adds तमिस्रा. 62 B वनितेति । 63 B धनुःशब्दा°, D असूः दम्भःशब्दा° । 64 D असम्भवात् । 65 Om GB. 66 G adds पूर्वं । 67 D adds पूर्वोक्तपरोक्तयोः । 68 D परोक्तो. 69 GD बलवान् । 70 B भूमेर्नाम्नो. 71 Om BD. 72 Om GBD. 73 Om B. 74 Om G. 75 G तिथिः । 76 B दुःखं च । 77 B adds सह पण्डितोदयश्च नित्यं सततं (?). 78 BD क्षुधा. 79 Om GD. 80 Om B. 81 Om BD. 82 Om D. 83 to 84 Om B. 84 G adds कृतिः प्रकृतिः आकृतिः विकृतिः सङ्कृतिः अभिकृतिः उत्कृतिः । 85 BD कृत्यक्तेत्यनेन. 86 Vide Addi. Notes. 87 G नाम्नि.

चारात्[88] । तस्मात् " हनस्त च " [कातन्त्र ४.२.२२=पा०३.१.१०८]— ब्रह्मणो हननं ब्रह्महत्या[89] । एवमश्वहत्या । " समजा० " [कातन्त्र ४.५ ७६] इत्यादिना[90] विहितस्य स्त्रियामेव विधानात्स्त्रीत्वं सिद्धम् । धाराहारागुहेत्यादीनां[91] त्वदन्तानां बालावबोधनार्थः पाठः[92] । प्रावृड् वर्षासमयः । दर्विः पाकोपकरणम् । मुद हर्षः । भाः दीप्तिः ॥ २३ ॥

वासोदशा मघा आपोऽप्सरसः कृत्तिकाः समा वर्षाः ।
बह्वर्था विंशतयस्त्वेकार्थाः स्युर्नवत्यन्ताः ॥२४॥

वाससो दशा वासोदशाः । बहवोऽर्था आसामिति बह्वर्थाः[93] । ताश्च[94] स्वभावात् व्यक्तिभेदे एव[95] वर्तन्ते, न जातावित्यर्थः । विंशतयस्त्विति बहुवचनं[96] गणं सूचयति । तुशब्दो वाक्यभेदे । नवतिरेवान्तोऽवयवः आसामिति[97] नवत्यन्ताः[98] । एक एवार्थः आसामिति एकार्थाः[99] । स्वभावात्समुदाये वर्तन्ते नावयवभेदे इत्यर्थः । वासोदशादयः स्त्रीलिङ्गाः स्युः[300] बह्वर्थाश्चेति । विंशत्यादयः स्त्रीलिङ्गाः स्युः[1] एकार्थाश्चेति[2] । वस्त्रस्य दशाः । अवस्थावाचिकायास्तु बह्वर्थतायां अनियमः[3] । इयं दशा अवस्था इति[4] । मघाः नक्षत्रविशेषः । आपो[5] जलम् । अप्सरसो देवकन्याः । कृत्तिकाः नक्षत्रविशेषः[6] । समाः संवत्सरः । केचित्समेति पाठं मन्यन्ते । तेषां इयं समा इत्यपि[7] भवति । " निर्गतत्वं समायाः[8] " इति भाष्यादौ[9] वाक्यदर्शनात् । वर्षाः ऋतुविशेषः । इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः च[10] ॥२४॥

शुक्तिः पामा सीमा जिह्वा कारेलयाशिषा संयत् ।
ईषा[18] नेमिसभाः खारी[20] स्त्रीलिङ्गा इति समाप्ताः ॥२५॥

एते[11] इलया आशिषा च सह स्त्रीलिङ्गा भवन्ति[12] । शुक्तिः जलादिपानोपकरणविशेषः[13] । पामा कण्डूः[14] । सीमा अवधिः[14a] । जिह्वा रसना[15] । कारा बन्धनगृहम्[16] । इला पृथ्वी । आशीः आशंसनम्[17] । संयत् सङ्ग्रामः । ईषा[18]

88 G व्यभि° । 89 B ब्रह्मणे ब्रह्महम् । 90 G जेत्यादिविहि° । 91 G °गुहादीनां । 92 Vide verses 13 and 18. 93 Om D. 94 Om GD; B भाश्च. 95 G न, D च, B एवम् । 96 B वचनं । 97 GB यासां । 98 Om BD. 99 Om GD. 300 Om G. 300 to 1 Om D. 2 D °र्थत्वेति. 3 D न नियमः । 4 Om G. 5 to 6 Om D. 6 G नक्षत्रम । 7 B इति. 8 G °याम् । 9 B °षादौ. 10 Om BD. 11 to 12 Om B. 12 Om G. 13 D जलजन्तुविशेषः, D °पकरणद्रव्यविशेषः । 14 GB कच्छूः । 15 G रसज्ञा. 16 G गोतिगृहं, D बन्दिः । 17 B adds दंष्ट्रा च । 18 BD ईशा.

ऋतुविशेषः[51] । समित् याज्ञिकप्रसिद्धं[52] प्रादेशमात्रं काष्ठम् । द्यौः स्वर्गः आकाशं[53] च[54] । सुमनाः पुष्पम्[55] । शोभनं मनो यस्येति बहुव्रीहिणा[56] तु वाच्यलिङ्गता । ऋक् वेदमन्त्रविशेषः[57] । भूनाम[58]—भूः भूमिः क्षितिरित्यादयः[59] । विद्युन्नाम[60]—विद्युत तडित् अचिराभेत्यादि । वल्लीनाम—वल्ली लता व्रततिरित्यादि । निशानाम—निशा क्षपा[61] रात्रिरित्यादि । अङ्गनानाम—अङ्गना योषित् वनितेत्यादि[62] । दिग्नाम—दिक् ककुप् काष्ठेत्यादि । नदीनाम—नदी सरित् धुनीत्यादि । अत्र कस्यचिद् अम्भः[63]—शब्दादेः नद्यादिनाम्नोऽपि असन्तत्वात्[64] नपुंसकत्वं एव[65] परत्वेन । क्वचित्[66] "**पूर्वपरयोः**[67] **परो**[68] **विधिः बलीयान्**"[69] इति । परस्येष्टवाचित्वात् । यथा कोः उषसश्च उदन्तस्य असन्तस्य च भूनाम्नो[70] अङ्गनानाम्नश्च स्त्रीत्वं सिद्धम्[71] ॥ २२ ॥

सम्पत् प्रतिपद् विपदापत् संसत् समिदपि[72] क्षुधा परिषत् ।
गायत्र्याद्याः क्यब्भावे प्रावृड्दर्विमुद्भासः ॥२३॥

क्षुधा[72] सह[73] एते स्त्रीलिङ्गा भवन्ति[74] । सम्पत् सम्पत्तिः । प्रतिपत् तिथिविशेषः[75] । विपद् विपत्तिः । आपद् आपत्तिः[76] । संसत्[77] सभा । समित् सङ्ग्रामः । क्षुत्[78] बुभुक्षा । परिषत् सभा । गायत्री आद्या यासामिति गायत्र्याद्याः[79] । गायत्री उष्णिग् अनुष्टुप् बृहती पङ्क्तिः त्रिष्टुप् जगती[80] अतिजगती[81] शक्वरी अतिशक्वरी अष्टिः[82] अत्यष्टिः[83] धृतिः अतिधृतिः[84]—एताश्छन्दोजातयः । भाव एव यः क्यप् तस्य ग्रहणम् । यस्तु "भावकर्मणोः कृत्यक्तखलर्थाः" [कातन्त्र ४.६.४७] इत्यनेन[85] विहितो न तस्य ग्रहणम् । यथा "नाम्नि वदः क्यप् च" [कातन्त्र ४.२.२०] इति[86] । नापि[87] "भावे भुवः" [कातन्त्र ४.२.२१] इत्यस्य अव्यभि-

---

50 Om G. 51 B adds वर्षश्च । 52 B याज्ञिकवस्तुविशेषं प्रसिद्धं° । 53 G आकाशः । 54 Om BD. 55 B adds देवाभिधानं (?) च । 56 B विग्रहबहुव्रीहिणा. 57 B देवमन्त्र° । 58 B भूमिनाम. 59 G इत्यादि, D इति. 60 From विद्युन्नाम to अङ्गनानाम there is a lacuna in G. 61 B adds तमिस्रा. 62 B वनितेति । 63 B धनुःशब्दा°, D असूः दम्भःशब्दा° । 64 D असम्भवात् । 65 Om GB. 66 G adds पूर्वं । 67 D adds पूर्वोक्तपरोक्तयोः । 68 D परोक्तो. 69 GD बलवान् । 70 B भूमेर्नाम्नो. 71 Om BD. 72 Om GBD. 73 Om B. 74 Om G. 75 G तिथिः । 76 B दुःखं च । 77 B adds सह पण्डितोदयश्च नित्यं सततं (?). 78 BD क्षुधा. 79 Om GD. 80 Om B. 81 Om BD. 82 Om D. 83 to 84 Om B. 84 G adds कृतिः प्रकृतिः आकृतिः विकृतिः सङ्कृतिः अभिकृतिः उत्कृतिः । 85 BD कृत्यक्तेत्यनेन. 86 Vide Addi. Notes. 87 G नाम्नि.

चारात्[88] । तस्मात् " हनस्त च " [कातन्त्र ४.२.२२=पा० ३.१.१०८]–ब्रह्मणो हननं ब्रह्महत्या[89] । एवमश्वहत्या । " समजा० " [कातन्त्र ४.५ ७६] इत्यादिना[90] विहितस्य स्त्रियामेव विधानात्स्त्रीत्वं सिद्धम् । धाराहारागुहेत्यादीनां[91] त्वदन्तानां बालावबोधनार्थः पाठः[92] । प्रावृड् वर्षासमयः । दर्विः पाकोपकरणम् । मुद् हर्षः । भाः दीप्तिः ॥ २३ ॥

वासोदशा मघा आपोऽप्सरसः कृत्तिकाः समा वर्षाः ।
बह्वर्था विंशतयस्त्वेकार्थाः स्युर्नवत्यन्ताः ॥२४॥

वाससो दशा वासोदशाः । बहवोऽर्था आसामिति बह्वर्थाः[93] । ताश्च[94] स्वभावात् व्यक्तिभेदे एव[95] वर्तन्ते, न जातावित्यर्थः । विंशतयस्त्विति बहुवचनं[96] गणं सूचयति । तुशब्दो वाक्यभेदे । नवतिरेवान्तोऽवयवः आसामिति[97] नवत्यन्ताः[98] । एक एवार्थः आसामिति एकार्थाः[99] । स्वभावात्समुदाये वर्तन्ते नावयवभेदे इत्यर्थः । वासोदशादयः स्त्रीलिङ्गाः स्युः[300] बह्वर्थाश्चेति । विंशत्यादयः स्त्रीलिङ्गाः स्युः[1] एकार्थाश्चेति[2] । वस्त्रस्य दशाः । अवस्थावाचिकायास्तु बह्वर्थतायां अनियमः[3] । इयं दशा अवस्था इति[4] । मघाः नक्षत्रविशेषः । आपो[5] जलम् । अप्सरसो देवकन्याः । कृत्तिकाः नक्षत्रविशेषः[6] । समाः संवत्सरः । केचित्समेति पाठं मन्यन्ते । तेषां इयं समा इत्यपि[7] भवति । " निर्गतत्वं समायाः[8] " इति भाष्यादौ[9] वाक्यदर्शनात् । वर्षाः ऋतुविशेषः । इयं विंशतिः त्रिंशत् चत्वारिंशत् पञ्चाशत् षष्टिः सप्ततिः अशीतिः नवतिः च[10] ॥२४॥

शुक्तिः पामा सीमा जिह्वा कारेलयाशिषा संयत् ।
ईषा[18] नेमिसभाः खारी[20] स्त्रीलिङ्गा इति समाप्ताः ॥२५॥

एते[11] इलया आशिषा च सह स्त्रीलिङ्गा भवन्ति[12] । शुक्तिः जलादिपानोपकरणविशेषः[13] । पामा कण्डूः[14] । सीमा अवधिः[14a] । जिह्वा रसना[15] । कारा बन्धनगृहम्[16] । इला पृथ्वी । आशीः आशंसनम्[17] । संयत् सङ्ग्रामः । ईषा[18]

---

88 G व्यभि° । 89 B ब्रह्मणे ब्रह्महम् । 90 G जेत्यादिविहि° । 91 G °गुहादीनां । 92 Vide verses 13 and 18. 93 Om D. 94 Om GD; B भाश्च. 95 G न, D च, B एवम् । 96 B वचनं । 97 GB यासां । 98 Om BD. 99 Om GD. 300 Om G. 300 to 1 Om D. 2 D °र्थंत्वेति. 3 D न नियमः । 4 Om G. 5 to 6 Om D. 6 G नक्षत्रम । 7 B इति. 8 G °याम् । 9 B °षादौ. 10 Om BD. 11 to 12 Om B. 12 Om G. 13 D जलजन्तुविशेषः, D °पकरणद्रव्यविशेषः । 14 GB कच्छूः । 15 G रसज्ञा. 16 G गोतिगृहं, D बन्दिः । 17 B adds दंष्ट्रा च । 18 BD ईशा.

लाङ्गूलावयवविशेषः । नेमिः चक्रावयवविशेषः[19] । सभा परिषद् । खारी[20] मानविशेषः । क्तिवर्जितादिकारान्तात्[21] स्त्रियां विभाषया[22] ईप्रत्यय उदाहर्तव्यः । पाशादेः[23] समूहे यः[24] । पाशानां समूहः पाश्या । एवं[25] तृण्या वात्या[26] धूम्या इत्यादयः । खलादेः च समूहे इन्[27] । खलानां समूहः खलिनी । एवं उलूकिनी[28] इत्यादयः । द्वन्द्वसमासाद्[29] [अ]देवासुरादेः वैरे अकः[30] । बाभ्रवाश्च शालङ्कायनाश्च तेषां[31] वैरं बाभ्रवशालङ्कायनिका । एवं[32] काकश्च उलूकश्च तयोर्वैरं[33] काकोलूकिकेत्यादयः । द्वन्द्वाद् विवाहे[34] अकः[35] । अत्रिश्च भरद्वाजश्च तयोर्विवाहो[36] ऽत्रिभरद्वाजिका । एवं शकुशकिका[37] कुत्सकुशिकिका[38] इत्यादयः । सङ्ख्यादेर्वीप्सायामकः[39] । द्वौ द्वौ पादौ ददाति द्विपादिकां ददातीत्यादयः । दण्डदानयोः[40] च सङ्ख्यादेरकः[41] । द्विशतं[42] दण्डितो ददाति द्विशतिकां[43] [ददाति] चेत्यादयः। रूढिशब्दा हि तद्धिता लोकतः सिद्धाः ॥ २५ ॥

इति[44] लिङ्गवृत्तौ[44] स्त्रीलिङ्गव्याख्यानं[45] समाप्तम् ॥

अथातः[46] पुंलिङ्गवाचकशब्दान् व्याख्यास्यामः ।[47]

[२. पुंलिङ्गप्रकरणम् ।]

कफपुङ्खनगश्लोकाः शङ्खमृदङ्गौ च शङ्कुनापाङ्गः ।
यानयुगपतङ्गकटाहैः सह मञ्चोटजतरङ्गाः ॥२६॥

एते पुंलिङ्गा भवन्ति यानयुगादिभिः सह[48] । कफः श्लेष्मा । पुङ्खः शरस्य पिच्छम्[49] । नगो वृक्षः पर्वतश्च । श्लोकः एकाक्षरादिपादच्छन्दः । कोपधत्वात्पुंस्त्वं

---

19 B adds सीमा च । 20 BD खारिः. 21 (P. 3. 3. 94) स्त्रियां क्तिन् । 22 GD विभाषा. 23 to 24 Om B. 25 Om G; G adds तृणानां समूहः । 26 Om GD. 27 Vide Addi. Notes. 28 D उलूलिनी, G उतूलिनी. 29 BD द्वन्द्वात् । 30 GB इकः G adds प्रत्ययः ! 31 G तयोः ! 32 Om BD. 32 to 33 Om G. 34 B विवादे. 35 GB इकः. 36 B विवादो. 37 D कुछ्कूछनिका. 38 D कुछ कुछौसिकिका. 39 Vide Addi. Notes. 40 to 41 Om G. 42 Om D. 43 Om B. 44 Om BD. 45 G स्त्रीवाचकशब्दव्याख्यानं. 46 to 47 Om BD. 48 G यानयुगादिभिः सहैते पुं० भ०. 49 Om GB.

सिद्धम्[50] । वृत्ताख्यत्वात्स्त्रीनपुंसकनिवृत्त्यर्थं[51] इह वचनम् । यशोवचनस्तु श्लोक-शब्दः पुंलिङ्गः कोपधत्वादेव[50] । शङ्खः निधिविशेषः । मृदङ्गः मुरजः[52] स्मृतः । शङ्कुः सङ्ख्याविशेषः । शतादिकत्वाद्[53] अस्य[54] नपुंसकत्वे प्राप्तम्[55] । कीलार्थस्य उद-न्तत्वात् पुंस्त्वं सिद्धम्[56] । अपाङ्गः चक्षुरन्तः[57] । यात्यनेन इति यानम् । शकटं रथश्च । तस्य युगो[58] यानयुगः । अन्यत्र " युगं युग्मं[59] कृतयुगं चत्वारि पुरुष-युगानि " इति[60] नपुंसकमेव । पतङ्गः शलभः सूर्यश्च । कटाहः भाण्डविशेषः[61] । मञ्चः काष्ठमयाधाराविशेषः । उटजः तापसपर्णकुटी । तरङ्गः कल्लोलः ॥ २६ ॥

वर्गः पूगलवङ्गौ गच्छः कच्छौघपथिमाथि च वृषलः ।
ध्वनिमुरजौ वृजिमुञ्जावङ्कोठकुठौ हठाङ्गुष्ठौ ॥२७॥

कच्छश्च ओघश्च पन्थाश्च मन्थाश्च इति समाहारो द्वन्द्वः । एते[62] पुंलिङ्गा भवन्ति । वर्गः समूहः । पूगः सङ्घातः[63] । लवङ्गः ओषधिविशेषः । गच्छः अभिमत-सङ्ख्यापर्यवसानम् । कच्छः पार्श्वम्[64] । ओघः समूहः । पन्थाः मार्गः । मन्थाः खजकः[65] । वृषलः शूद्रः[66] । लोपधत्वान्नपुंसकत्वं प्राप्तम्[67] । ध्वनिः शब्दः । मुरजो मृदङ्गः । वृजयो जनपदविशेषः[68] । एष[69] बहुवचनान्तश्च[70] । मुञ्जः[71] शरेषीका । अङ्कोठश्च कुठश्च स्वरादेः[72] अदन्तस्य प्रायेण[73] पूर्वौ निपातो दृश्यते । अङ्कोठो वृक्षविशेषः । कुठो वृक्षः[74] । प्रपञ्चार्थौ एतौ[75] । बिल्वादित्वात्पुंस्त्वं सिद्धम्[76] । हठो बलात्कारः । अङ्गुष्ठः अङ्गुलिविशेषः[77] ॥ २७ ॥

कोष्ठपुरोडाशकमठगुडलगुडव्रातगण्डगोण्डार्घाः ।
पिण्डशिखण्डपिचण्डाः वण्डकरण्डौ वरण्डश्च ॥२८॥

एते[78] पुंलिङ्गा भवन्ति[79] । कोष्ठः आश्रयः[80] । पुरोडाशः पिष्टपिण्डविशेषः ।

---

50 Vide verse 39. 51 Vide verse 83. 52 G मरुजः B मुरजम् । 53 Vide verse 52; G शतादिवाचित्वाद् B शतादित्वात् । 54 G adds शङ्कुशब्दस्य. 55 G सिद्धम् । 56 Vide verse 35. 57 B चक्षुरवयवविशेषः, D चक्षुरन्तार्विशेषः । 58 Vide Addi. Notes. 59 B adds " युगादिराकृतिविशेषभावत्वात् " वचनादन्यत्र न प्राप्तम् । यथा कृत० । 60 G तत्र. 61 पाकभाण्डविशेषः महिषीशिशुश्च । 62 G adds वर्ग-पूगादयः शब्दाः । 63 B गुवाकः । 64 B पानः । 65 B adds मन्थनदण्डश्च । 66 D शूद्रविशेषः । 67 Vide verse 54. 68 GBD °षाः । 69 Om GD. 70 B adds स्वर्भावात् । D adds विशेषाभावात् । 71 D adds शरकडशरी. 72 D स्वस्वरादेः । 73 B प्राप्ते. 74 B शालवृक्षः । 75 G adds अङ्कोठकुठौ शब्दौ । 76 Vide verse 34. 77 G adds आयविशेषश्च । 78 G adds शब्दाः । 79 Om G. 80 G हृदयं भाण्डागारश्च ।

कमठः भिक्षाभाजनम् । कूर्माभिधायिनः[81] तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात्[82] । गुडः[83] इक्षुविकारः[84] । लगुडः लोहमयप्रहरणम् । व्रातः समूहः । गण्डो रोगविशेषः । प्राणिवचनस्य तु स्त्रीपुंस्त्वं चतुष्पदनामत्वात्[85] । गोण्डः भारवाहविशेषः[86] । अर्घो मूल्यं पूजाविशेषश्च । पिण्डः कायः । लोहे तु नपुंसकत्वं लोहपर्यायत्वात्[87] । सक्त्वादिसम्बन्धिनः[88] तु स्त्रीत्वमपि दृश्यते । नदादेः आकृतिगणत्वात्[89] । शिखण्डः चूडा । पिचण्डः जठरम्[90] । वण्डः[91] दुश्चर्म[92] । करण्डः भाण्डविशेषः । वरण्डः शरादिसङ्घातविशेषः[93] मुखरोगश्च[94] ॥ २८ ॥

वृष्णिः षण्डः[95] षण्ढो मुहूर्तविट्पुञ्जरैहरिद्गरुतः ।
प्लुतदृतिगञ्जकृतान्ता[1a] वमत्यतिथिसारथिग्रन्थि ॥२९॥

वमतिश्च अतिथिश्च सारथिश्च ग्रन्थिश्चेति समाहारो द्वन्द्वः । एते[96] पुंलिङ्गा भवन्ति[97] । वृष्णिः कुलविशेषः[98] । मेषवाचिनस्तु परत्वात्[99] स्त्रीपुंस्त्वम् ।[400] षण्डः[95] सङ्घातः । षण्ढः[1] नपुंसकम्[2] । मुहूर्तः घटिकाद्वयम्[3] । विड् वैश्यो नरश्च । विष्ठा-वाचिनस्तु[4] स्त्रीलिङ्गत्वं[5] प्रयोगतः[5] भाषायां दृश्यते । पुञ्जो वृन्दम् । रा द्रव्यम् । हरिद् वर्णविशेषः । गरुत् सुवर्णं पक्षश्च[6] । प्लुतः स्वरविशेषः । यस्तु प्लवनक्रिया-निमित्तः[7] प्लुतशब्दस्तस्य वाच्यलिङ्गता । दृतिः चर्म[8] । गञ्जो भाण्डागारः[9] । कृतान्तो यमः । वमतिः वान्तिः । अतिथिः अभ्यागतः । सारथिः रथवाहः ।[10] ग्रन्थिः रज्ज्वादिवेष्टितगाढबन्धः[11] ॥२९ ॥

कुन्तान्तबलीवर्दाः शब्दार्थौ ह्रदजनपदमगधाश्च ।
मकरन्दकुन्दकन्दाः सबुद्बुदाः कासमर्दैन ॥३०॥

---

81 B °भिधानस्य. 82 GD द्विचतुष्प° । Vide verse 82. 83 to 85 Missing in B. 84 to 85 Missing in D. 84 D इक्षुविशेषः । 85 GB द्विचतुष्प° । Vide verse 82. 86 B वाहचारविशेषः । 87 Vide verse 53. 88 D संख्यादि° G शंक्वादि° B मृदादिसम्बन्धतः । 89 Vide Addi. Notes. 90 D जठरः । 91 G चण्डः. 91, 92 B वरण्डः विकर्मचाण्डालः । 93 G adds वंशपात्रादिनिर्मितभाण्डविशेषश्च and gives this as well as शरादि° as senses of करण्ड. Then it has वरण्डो मुखरोगः। 94 Om D. 95 G खण्डः B सण्डः । 96 G adds वृष्ण्यादयः शब्दाः । 97 Om G. 98 G यदुकुलपूर्वजः । 99 Vide verse 82. 400 G adds: "हुडुरुरणो वृष्णिमेषमेढ्राः स्युः" 1 G सण्ढः । 1a All Mss. °गुञ्ज°. 2 G नपुंसकः । 3 B पिण्डिकार्धम्. 4 D °वचनस्य. 5 D स्त्रीलिङ्ग एव प्रयोगः । 6 G Om पक्षश्च. 7 B खादनपठनाक्रिया°. 8 G चर्ममयो जलाधारविशेषः । दईडु । 9 B °रम् । 10 B °वाहकः । 11 B °बन्धनम् ।

कासमर्देन सहैते पुंलिङ्गा भवन्ति[12] । कुन्त आयुधविशेषः[13] । अन्तोऽवसानम् । बलीवर्दः अनड्वान् । शब्दः ध्वनिः । अर्थः धनादिः[14] । ह्रदः जलाधारविशेषः[15] । जनपदो जनसमूहः[16] । मगधाः जनपदविशेषः[17] । रूढितश्च[18] बहुवचनान्तोऽयम् । मकरन्दः पुष्परसः । कुन्दः पुष्पविशेषः[19] । कन्दः मूलविशेषश्च[20] । बुद्बुदः जलादिसंस्थानविशेषः[21] । कासमर्दः ओषधिविशेषः[22] ॥ ३० ॥

कपिकविकितवदवकलहदावा वंशांशराशिसत्त्वाश्च ।
अर्दन्यहीनरेफाः कृमितिमिपृष्ठ्यास्तथा सीरः[23] ॥३१॥

एते पुंलिङ्गा भवन्ति[24] । कपिर्मर्कटः । कविः काव्यकृत् शुक्रश्च । कितवो द्यूतकारः[25] । दवः वनं वनाग्निश्च[26] । कलहः कलिः । दावः दवार्थः[27] एव[28] । वंशोऽन्वयः वेणुश्च । अंशो भागः[29] । राशिः निचयः[30] । सत्त्वः प्राणी[31] । द्रव्यवचनस्य गुणवचनस्य च नपुंसकत्वमेव[32] दृश्यते । सत्त्वं द्रव्यम् । सत्त्वं रजस्तम इति । अर्दनिः अग्निः । अश्ववृत्तेस्तु स्त्रीपुंस्त्वं[33] चतुष्पदनामत्वात्[33a] । अहीनः क्रतुविशेषः[34] । रेफः अक्षरविशेषः[35] पापं च । कृमिः जन्तुविशेषः[36] । तिमिः मत्स्यविशेषः[37] । पृष्ठ्यः क्रतुविशेषः । सीरः[23] हलम्[38] ॥ ३१ ॥

अम्बस्तम्बौ पुत्रच्छात्रामित्राश्च वृत्रमन्त्रौ च ।
पञ्चालपीलुपिप्पलगुग्गुलुहिङ्गुलकुलालाश्च ॥३२॥

एते पुंलिङ्गा भवन्ति[39] । अम्बः सरकादीनाम्[40] । स्तम्बः व्रीह्यादीनां प्रकाण्डविशेषः । पुत्रः सुतः । पुत्रीति नदादित्वात्[41] । छात्रः[42] शिष्यः । अमित्रः शत्रुः[43] । वृत्रः असुरविशेषः[44] । मन्त्रः ऋगादिलक्षणः । पञ्चालाः[45] जनपदविशेषः । बहुवचनान्तोऽयं[46] रूढितः[47] । पीलुः हस्ती वृक्षविशेषश्च । फलवचनस्य

---

12 Om G. 13 G आयुधम् । and adds: "प्रासो निगदितः कुन्तः". 14 G adds, श्लोकादिव्याख्यानं च । 15 B जलागाधः D जलाश्रयवि°. 16 G adds, देशश्च । 17 G देशविशेषाः । 18 to 20 Lacuna in D. 19 G कुसुमवि°. 21 D जलादिस्थान°. 22 G ओषधिः । 23 B उशीरः D शीरः । 24 Om G. 25 G धूर्तो द्यूतकारश्च । 26 B दवाग्निश्च । 27 B दवार्थं एव । 28 G adds: "स्मृतौ काननेऽपि दवदावौ". 29 B adds, सूक्ष्मश्च (?). 30 B समूहः । 31 D प्राणः । 32 G Om एव. 33 G adds च दृश्यते । 34 G adds शेषश्च. B adds नागराजश्च सम्पूर्णश्च । 35 D अक्षरः. । 36 D जन्तुः । 37 G मत्स्यः । 38 B हलः । 39 Om G. 40 G शरकादीनां प्रकाण्डविशेषः, B सरकादीनां अश्वन(?)विशेषः । 41 GB नदादिपाठात् । 42 D adds विद्यायुक्तः ।

तु नपुंसकत्वं परत्वात्[48] । पिप्पलः वस्त्रच्छेदनविशेषः । वृक्षवाचिनस्तु स्त्रीत्वमपि[49] । पिप्पलीति नदादित्वात् । फले[50] स्त्रीत्वमेव—अर्धपिप्पलीति । गुग्गुलुः वृक्षविशेषः । हिङ्गुलः रागद्रव्यविशेषः[51] । कुलालः कुम्भकारः तद्भाण्डं[52] च[53] ॥ ३२ ॥

तण्डुलमञ्जुलकाला मौलितरलपाशपुद्गल[54]कुशूलाः ।
रालिरनिलकीलपटोलकेलितूलानलैस्तालः ॥३३॥

एते पुंलिङ्गा भवन्ति[55] । तण्डुलो धान्यसारः[56] । मञ्जुलः लताविशेषः[57] । कालः समयो देवश्च । मौलिः मुकुटम् । तरलः हारमध्यगतो मणिः[58] । पाशः बन्धनम् । पुद्गलः[54] आत्मा । कुशूलः धान्याधारविशेषः[59] । रालिः[60] युद्धम् । अनिलो वातः । कीलः शङ्कुः । पटोलः ओषधिविशेषः । केलिः परिहासः । तूलः उन्मानम्[61] । अनलः अग्निः । तालः वृक्षविशेषः ॥ ३३ ॥

अञ्जलिशैवल[62]कम्बलपल्लववातूलसृमल[63] कलिबलयः ।
बिल्वादयोऽपि तरवः स्त्रियां मताः शिंशपाद्यास्तु ॥३४॥

एते पुंलिङ्गा भवन्ति[64] । बिल्वादयोऽपि तरवः[65] पुंलिङ्गा इत्यर्थः[66] । शिंशपाद्यास्तु वृक्षविशेषाः स्त्रियां मताः स्त्रीलिङ्गा इत्यर्थः[67] । अञ्जलिः करसम्पुटः[68] । शैवलः[62] जलतृणविशेषः । कम्बलः गोगलचर्म । प्रावरणविशेषस्य तु स्त्रीत्वमपि कम्बलीति । नदादित्वादी[69] । पल्लवः किशलयम् । नपुंसकमपि[70] केचित् । वातूलो वातसमूहः । सृमरः[71] अवयवपर्यायः[72] । कलिर्युद्धं युगविशेषः[73] च । बलिः करः असुरविशेषः[74] । बिल्वः धवः अशोकः[75] पुन्नागः अर्जुनः मातुलिङ्गः लकुचः[76] पारिजातकः इत्यादयः । शिंशपाद्याः—शिंशपा पाटला शमी[77] इत्यादयः । प्रयोगतः अङ्कोठस्य कुठस्य[78] च[78] वृक्षत्वात् पुंलिङ्गत्वं[79] सिद्धम् । फलार्थः पाठः प्रपञ्चार्थः[80] इत्येके ॥३४॥

---

43 G adds: मित्रस्य नपुंसकत्वम् । तथा च । " तस्य मित्राण्यमित्रास्ते ये [चान्ये] चोभये नृपाः" [शिशुपालवध 2.101] इत्यादिप्रयोगः । 44 G देवेन्द्रशत्रुः । 45 BD पञ्चालः । 46 Om G. 47 D रूढिः । 48 Om G; Vide verse 54; G adds: पीलुने इति प्रयोगः । 49 B स्त्रीपुंस्त्वमिति. 50 B adds तु. 51 G adds: " हिङ्गुलौ हिङ्गुलोऽपि स्याद् गुग्गुलौ गुग्गुलोऽपि च", 52, 53 Om B. 53 G वा. 54 D मुद्गल. 55 Om G. 56 B धान्यमध्यसारः । 57 G तालवि° B मनोज्ञः । 58 B हारगतो मध्यमणिः चञ्चलश्च । 59 B धान्यादेराधार°. 60 B कालिः । 61 B adds पिचुश्च । 62 B सैवल. 63 B सृमर. 64 Om G. 65 G adds तेऽपि. 66 to 67 Om GB. 68 B करसम्पुटम् । 69 B Om ई । 70 G °कामिति D°कत्वमिति । 71 GD सृमलः । 72 B गवयविशेषः । 73 B युगादिविशेषः । 74 G असुरश्च, B Om असुरविशेषः, D adds पूजोपकरणं च । 75 Om B. 76 Om G. 77 B चिञ्चा, D विडा समी । 78 Om B. 79 B पुंलिङ्गं । 80 G प्रपञ्चः Vide verse 54.

पाप्माश्मा श्लेष्मात्मा वणिगूष्मा स्कन्धगन्धगर्मुच्च[81] ।
अनन्तमसन्तमुदन्तं[82] शम्ब[83] नितम्बौ च कुक्ष्यंह्री[84] ॥३५॥

उभयत्रापि[85] समाहारो द्वन्द्वः[86] । एते पुंलिङ्गा भवन्ति[87] । पाप्मा पापम् । अश्मा शिला[88] । श्लेष्मा कफः । आत्मा शरीरम् । वणिग् वाणिजः[89] । ऊष्मा सन्तापः । स्कन्धः अंसदेशः[90] । गन्धः गुणविशेषः । गर्मुत्[91] । सुवर्णम् । अनन्तं यथा—वृषा इन्द्रः, उक्षा[92] प्लीहा मज्जा । असन्तं यथा—चन्द्रमाः अङ्गिराः उशनाः पुरुदंशाः[93] अनेहाः । उदन्तं यथा—वायुः जायुः[94] मेरुः जन्तुः पीलुः । गुग्गुलुहिङ्गुलूनां लोपधत्वान्नपुंसकत्वं प्राप्तम्[95] । शम्बः[96] पविः । नितम्बः कटिप्रदेशः कुक्षिः जठरम्[97] । अंह्रिः पादः ॥ ३५ ॥

स्वर्गदिन[98]मानसंवत्सरनरयज्ञकुचकेशमासर्तु[99] ।
अरिगिरिजलदजलधिविषसुरासुरास्यात्म[500]भुजभुजङ्गाः ॥३६॥
शरनखरकपोलकदन्तपङ्कगुल्फौ[1]ष्ठकण्ठरश्म्यनिलाः ।
एषां संज्ञा धान्यान्युक्तो नाडीव्रणः पण्डः ॥३७॥

कपोल एव कपोलकः । स्वार्थे कः । एषां स्वर्गादीनां संज्ञा धान्यानि व्रीहयश्च[2] पुंलिङ्गा भवन्ति । नाडीव्रणः पण्डः[3] च पुंलिङ्ग उक्तः[4] । तत्र[5] स्वर्गः नाकः त्रिदिव इत्यादयः[6] । दिनो[7] दिवसः वासरः घस्रः[8] इत्यादयः[9] । मानः प्रस्थः कुडवः इत्यादयः । संवत्सरः संवत्[10] अब्दः इत्यादयः । नरो मर्त्य इत्यादयः[11] । यज्ञः क्रतुः मख इत्यादयः । कुचः स्तन इत्यादयः । केशः कचः मूर्द्धज इत्यादयः । मासाख्याः[12] कार्तिक-मार्गशीर्षपौषादयः[13] । ऋतुः हेमन्तशिशिरवसन्तादयः[14] । अरिः शत्रुः रिपुः[15] इत्यादयः[24] । गिरिः[16] अद्रिः शैल इत्यादयः[17] । जलदः मेघ इत्यादयः[18] । जलधिः

81 G गर्मुं च, B शर्मं च 82 D¹ अनसन्तं चोदन्तं. 83 BDD¹ सम्ब. 84 B °भ्री. 85 to 86 Om G. 87 Om G. 88 G पाषाणः. 89 G वणिजः B वणिजविशेषः च. 90 B अंसैकदेशः 91 G गर्मुं B शर्मं. 92 D वृक्षा, G adds वृषभः । 93 GDB पुरदंशाः 94 B पायुः यजुः G om वायुः । 95 Vide verse 54. 96 D सम्बः, G adds वज्रः 97 D जठरः 98 B दिवस. 99 GD °र्तुः 500 G °राश्वात्म° 1 BGDD$_1$ गुल्मौ° 2 B adds एते. 3 G पिण्डः B पण्डुः 4 B इत्युक्तः D adds इत्यर्थः 5 G adds स्वर्गादि 6 G इत्यादि. 7, 8 Om B 9 D इति, Om B 10 B शरत् । 11 Om G 12 B मासाः 13 G °पौष इत्यादयः B कार्तिकः फाल्गुनकः मार्गशीर्षः पुष्य इत्यादयः 14 G °वसन्त इत्यादयः BD Om शिशिर. 15 Om G 16 to 17 Om B 18 G इत्यादि.

अर्णवः समुद्र इत्यादयः[19] । विषाख्याः विषः[20] गरः[21] हालाहलः[22] कालकूटः ब्रह्मसुतः[23] इत्यादयः । सुरो देवः विबुध इत्यादयः[24]। असुरो दानवो दैत्य इत्यादयः[24] । असिः निस्त्रिंशः खड्गः इत्यादयः[24] । आत्मा जीवः अन्तर्भोक्ता इत्यादयः[24] श्लेष्मात्मेतिग्रहणं[25] अन्नन्तत्वात्परं नपुंसकत्वं[26] स्यादिति । भुजः[27] करः पाणिः दोः इत्यादयः[24] । भुजङ्गः[28] पन्नगः फणी इत्यादयः[24] ॥ ३६ ॥

शरः काण्डः शिलीमुख इत्यादयः[24] । नखराः नखाः करजाः इत्यादयः[24]। कपोलकः[29] गण्डः करट इत्यादयः[24] । दन्ताः दशनाः रदना इत्यादयः[24] । पङ्कः कर्दमः निषद्वरः[30] इत्यादयः[24] । गुल्फः[31] [नि–] स्तोदः[32] घुटः[33] इत्यादयः[24] । ओष्ठः दन्तच्छदः[34] अधर इत्यादयः[24] । कण्ठः गल इति[35] । लोपधत्वात् नपुंसकं[36] अपि[37] न[38] स्यात् । " पूर्वपरयोः परो विधिः बलीयान्[39] " इति परस्येष्टवाचिकत्वात् । रश्मिः किरणः अंशुः इत्यादयः[40] । अनिलः वातः पवनः इत्यादयः । धान्याख्याः[41] —शालिः कलमः[42] सुगन्धिकः[43] षष्टिकः नीवारः तिलः माषः श्यामाकः[44] मुद्गः मसूरः इत्यादयः[45] ।नाडीव्रणः, पुन्नपुंसकत्वात्[46] व्रणस्य वचनम्। पण्डः नपुंसकम्[47] ॥ ३७ ॥

असवो दारा लाजा बह्वर्था बल्वजाः किना दाश्च[48] ।
भावे को णोऽथुरला घघञावुक्तौ सहेम्ना नञ् ॥३८॥

असुप्रभृतयः पुंलिङ्गा बहुवचनान्ता नित्यं भवन्ति । किना युक्तो घुसंज्ञकः [च] भावेऽर्थे कप्रत्ययः [च] णप्रत्ययश्च अथुप्रत्ययश्च अलृप्रत्ययेन सह पुंलिङ्गाः स्युः[49] । घप्रत्ययघञ्प्रत्ययौ[50] च इमनुप्रत्ययेन सह नञ्प्रत्ययश्च पुंलिङ्गा[51] इत्यर्थः[52] । असवः प्राणाः । दाराः भार्या । लाजाः भृष्ट[53]धान्यविशेषः[54] । बल्वजाः तृणविशेषः[55] । अङ्गाः वङ्गा इत्यादयस्तु लोकत एव सिद्धाः । " उपसर्गे दः[56] किः " [कातन्त्र ४.५.७०]–आदिः आधिः[57] । " कर्मण्यधिकरणे च "[कातन्त्र

19 G इति. 20 Om GB 21 B गदः D गरलः 22 B हलाहलः 23 D ब्रह्मपुत्रः 24 G इति. 25 Vide verse 35. 26 Vide verse 52. 27 B adds बाहुः 28 G भुजगः 29 GD कपोलः 30 D निषद्वरः 31 GBD गुल्मः 32 D स्वेदः 33 G पुटः 34 G दन्तच्छदनः 35 B इत्यादयः। 36 G नपुंसकत्वं 37 D इति 38 Om G 39 G बलवान् ; 40 G इति 41 to 45 Missing in G 42 D कलविः (कलम्बी ?) 43 GB सुगन्धकः 44 D श्यामकः 46 B नपुंसकत्वात्, but vide verse 63 in which व्रण is mn 47 G नपुंसकत्वम्, B adds इति. 48 G धुश्च B दिश्च. 49 BD इत्यर्थः 50 to 52 Missing in D 51 Om B 53 BG भ्रष्ट D भ्राष्ट. 54 GB °विकारः 55 GD °प्रकारः 56 G घोः 57 Om D, B adds सामनी व्याख्या (?)

४.५.७१=पा० ३.३.९३]–जलधिः शरधिः। कान्तो यथा–"स्थास्नापा[58] व्यधिहनियुधिभ्यः क इष्यते"[?] –आखूनामुत्थानं आखूत्थः[9]। शलभोत्थः[60] इत्यादयः[61]। णान्तो यथा–"नौ ण च" [कातन्त्र ४.५.४३=पा०३.३.६०]–न्यादः इत्यादयः। अथ्वन्तो यथा–"ट्वनुबन्धादथुः" [कातन्त्र ४.५.६७][62]–वेपथुः वेपनं इत्यादयः। अलन्तो यथा–"स्वरवृद्दगमिग्रहामल्"[कातन्त्र ४.५.४१][63] –चयनं चयः जयः इत्यादयः इति[64]। अकर्तृकारकविषयाणां तु वाच्यालिङ्गता भवति[65]। घप्रत्ययान्तो[66] यथा–"पुंसि संज्ञायां घः" [कातन्त्र ४.५.९६]—उरश्छदः निगमः। घञन्तो यथा–पादः[67] रोगः[68] लोभः[69] प्रस्तारः प्रासादः[70] इत्यादयः[71]। इमन्प्रत्ययान्तो[72] यथा–पृथोर्भावः प्रथिमा, मृदोः[72] भावः म्रदिमा[74] यस्तु औणादिकः कर्तरि व्युत्पाद्यतेऽभियुक्तैस्तस्य वाच्यलिङ्गतैव–भारिमा[75] पृथ्वी,[76] वरिमा[77] तपस्वी, इत्यादयः[78]। नञन्तो यथा–"याचिविछिप्रछियजिस्वपिरक्षियतां नङ्[कातन्त्र ४.५.६१]–विश्नः प्रश्नः[79] ॥ ३८ ॥

प्राग्वंश-कषणभमरपथसटनयोपधक–वोपधमदन्तम् ।
क्षत्रियवचनो नाभिश्चेत्पुंलिङ्गा इति समाम्नाः ॥ ३९ ॥

कश्च षश्च णश्च भश्च मश्च रश्च पश्च थश्च सश्च टश्च नश्च यश्च, ते उपधा यस्येति शेषाद्[80] बहुव्रीहौ कः। व उपधा यस्य[81] स वोपधः। प्राग्वंशश्च कषणभमरपथ-सटनयोपधकश्च वोपधश्चेति समाहारो द्वन्द्वः। अत् अन्तो[82] यस्य तद् अदन्तम्। प्राग्वंशशब्दः [च] ककारादिवर्णोपधं च शब्दरूपं क्षत्रियवचनो नाभिश्च यदि भवति तदैते पुंलिङ्गा भवन्ति। प्राग्वंशः यज्ञगृहम्[83]। ककारोपधमदन्तं यथा–अर्कः शुल्कः[84]। षकारोपधं[85] यथा—शिरीषः जिनाक्षः[86] यानाक्षः[87]। णकारोपधं[88] यथा–काणः शाणः[89]। भकारोपधं[90] यथा–स्तम्भः कुम्भः। मकारोपधं[91] यथा–

---

58 D पिबति. 59 G आखूत्थम्। 60 Om B 61 Om G 62, 63 Vide Addi Notes 64 Om D 65 B भावः 66 G घो. 67 B गदः 68 GD रागः 69 B adds लेशः. D adds लोपः लेखः 70 D प्रसादः 71 Om G 72 D °प्रत्ययो. 73 to 74 Om D and adds अदि (णि?) मा. 75 D गरिमा. 76 B adds इत्याह, G om पृथ्वी. 77 to 78 Om B 79 B adds स्वप्नः 80 G adds वा. 81 B adds इति. 82 D अन्ते. 83 G adds; "पत्युः प्राग्वंशवासिनः" इति काव्ये। 84 B शुक्रः 85 G षोपधं। 86 D यक्षः वाताक्षः 87 G यनाक्षः 88 G णोपधं; G omits यथा here and in all similar places in this para 89 D शोणः 90 G adds in margin भोपधं गर्भस्तम्भादयः 91 to 92 Om B,

धूमः सोमः[92]। रकारोपधं[93] यथा[94]—अङ्कुरः श्वशुरः। पकारोपधं[95] यथा[96]—सर्पः शूर्पः[97]। थकारोपधं[98] यथा[99]--रथः सार्थः। सकारोपधं[600] यथा[1]—कुत्स[2]: सर्जरसः। टकारोपधं[3] यथा[4]—कुटः घटः। नकारोपधं[5] यथा[6]—फेनः[7] ब्रध्नः[8]। यकारोपधं[9] यथा[10]—व्ययः सङ्ख्यः[11]। वकारोपधं[12] यथा[13]—उद्यावः[14] आसवः। नाभिः क्षत्रियः। प्राण्यङ्गं तु नाभिरियं इदन्तत्वात्[15] ॥ ३९ ॥

इति[16] लिङ्गवृत्तौ[17] पुंलिङ्गव्याख्यानं[18] समाप्तम् ॥

अथातो[19] नपुंसकलिङ्गवाचकान् शब्दान् व्याख्यास्यामः।[20]

[३. नपुंसकलिङ्गप्रकरणम् ।]

शालूककारकोल्मुकचेतकचिबुकांशुकभगलिङ्गाङ्गम् ।
चोचं पिच्छं बीजं भेषजमाज्यं मुकुटमुडुपम् ॥ ४० ॥

एते नपुंसकलिङ्गा भवन्ति। शालूकं उत्पलादिमूलम्[21]। कारकं क्रियानिमित्तमात्रम्[22]। अन्यस्तु कारयतीति[23] कारिका स्त्री, कारकः पुमान्, कारकं कुलम्। उल्मुकं अर्धदग्धं काष्ठम्। चेतकं हरीतकीफलम्[24]। चिबुकं वदनैकदेशः[25]। अंशुकं वस्त्रम्। भगं ज्ञानम्। लिङ्गं चिह्नम्[26]। अङ्गं अवयवः। चोचं उपभुक्तफलावशेषः[27]। फलवाचिनस्तु नपुंसकत्वं सिद्धं " फललोपध–" [कारिका ५४] इत्यनेन। पिच्छं मयूरकलापः। बीजं उत्पत्तिहेतु[28]। भेषजं औषधम्। आज्यं घृतम्। मुकुटं मौलिः। उडुपं जलतरणोचितघटितकाष्ठानां सञ्चयविशेषः[29] ॥ ४० ॥

---

93 G रेफोपधं. 94 Om G 95 to 97 Om B: 96 Om G 97 G सूर्पः 98 G थोपधं. 99 Om G 600 G सोपधं. 1 Om G 2 D कुशः 3 G टोपधं. 4 Om G 5 G नोपधं. 6 Om G 7 D वेनः स्तेनः 8 Om B 9 G योपधं 10 Om G 11 Om B, D सव्यः 12 G वोपधं. 13 Om G 14 D उद्यवः, G उद्भवः 15 Vide verse 22. 16 Om D 17 B लिङ्गकारिकावृत्तौ, Om D. 18 G पुंलिङ्गशब्दानां व्या° 19to20 Om BD. 21 B उत्पलमूलविशेषः 22 B क्रियाकारकं निमि° 23 GB करोतीति. 24 D हरीतकी तत्फलं च, B हरीतकी तत्फली. 25 G adds, अभिधाने ओष्ठस्याधश्चिबुकम्। 26 B शेफश्च 27 B उत्पलविशेषः G °फलविशेषः D °त्कदलादिशेषः। 28 B °हेतुः। 29 G जलतरणघटितकाष्ठविशेषः B °णघटकाष्ठानां विशेषः।

शृङ्गाटललाटतिरीट[30] पिटानि[31] खपीठलोष्टकाष्ठानि ।
पृष्ठं तुण्डं कण्ठालीढे भाण्डाण्डकुण्डानि ॥ ४१ ॥

एते नपुंसकलिङ्गा भवन्ति[32] । शृङ्गाटं नड्वलोद्भवं प्रसिद्धमेव[33] । ललाटं प्राण्यङ्गविशेषः[34] । तिरीटं[35] वेष्टनम् । पिटं छर्दिः । खं इन्द्रियं आकाशश्च । पीठं आसनविशेषः[36] । लोष्टं मृत्संस्थानविशेषः[37] । काष्ठं दारु[38] । पृष्ठं प्राण्यङ्गविशेषः[39] । तुण्डं मुखाग्रम्[40] । कण्ठं शरकाण्डम्[41] । आलीढं स्थानविशेषः[42] । भाण्डं परिस्कारः[43] । अण्डं पक्ष्यादिप्रसवः । कुण्डं भाण्डविशेषः ॥ ४१ ॥

प्रत्यालीढं शरणं च शणमृणं कारणममृतमलातम् ।
पलितं शुक्तं नवनीतं लोकायतमरकते च ॥ ४२ ॥

एते नपुंसकलिङ्गा भवन्ति[44] । प्रत्यालीढं स्थानविशेषः । शरणं त्राता[45] । शणं धान्यविशेषः[46] । ऋणं यदुत्तमर्णाय देयम्[47] । कारणं हेतुः । अमृतं सुरभोज्यं जलं[48] वा[48] । अलातं उल्मुकम् । पलितं पक्वकेशः[49] । शुक्तं अम्लं परुषश्च[50] । नवनीतं घृतकारणम् । लोकायतं शास्त्रविशेषः । मरकतं रत्नविशेषः ॥ ४२ ॥

जतु वस्तु मस्तु चित्तं पित्तं तोकं निमित्तशवबडिशम् ।
अस्थ्युक्थसक्थि सनिरुक्तमङ्गदेङ्गुदगुदपदमृधम् ॥ ४३ ॥

एते नपुंसकलिङ्गा भवन्ति[51] । सह निरुक्तेन सनिरुक्तम् । जतु लाक्षानिर्यासः । वस्तु पदार्थः । मस्तु दधिविकारः । चित्तं मनः । पित्तं मायुः[52] । तोकं सुतः[53] । निमित्तं कारणम् । शवं मृतशरीरम् । बडिशं मत्स्यबन्धनम्[54] । अस्थि कुल्यम्[55] । उक्थं साम । सक्थि शरीरावयवविशेषः[56] । निरुक्तं ग्रन्थविशेषः । अङ्गदं केयूरम् । इङ्गुदं वृक्षविशेषः । गुदं अपानम् । पदं स्थानं लक्षणं[57] च पादश्च । मृधं युद्धम् ॥ ४३ ॥

---

30 G किरीट, D तरीट. 31 D_1 पिठानि. 32 Om G. 33 B शृङ्गाटं चतुष्पथं जलोद्भवफलेपि च । 34 G °ण्यङ्गम् । 35 G किरीटं. 36 G आसनम् । 37 B मृत्स्थान°. 38 G दारुविशेषः, 39 G देहपश्चिमभागः । 40 G वदनं वक्त्रम् । 41 B पात्रम्, D पापम्, G adds कण्ठो गलः । 42 D धनुर्धरावस्थान°. 43 Vide Addi. Notes. 44 Om G. 45 B adds गृहम् । 46 B धनं भोगस्थानम् (?). 47 GBD यदुत्तमाय° G adds धनम् । 48 Om B. 49 B केशपाकः. 50 Vide Addi. Notes. 51 Om G. 52 BD पायुः. 53 G adds : अभिधाने " तुक्तोकं तनयश्च नन्दन इति प्राज्ञैरपत्यं स्मृतम् " इत्यादि । 54 B मत्स्यवेधोपायविशेषः D मत्स्यबन्धनोपायविशेषः 55 GD कुल्यम् । 56 G शरीरावयवः । adds ऊरुः । 57 GB लक्ष्यं.

काकुद्मास्पदबाह्लवदधिकिण्वश्राद्धवाजपेयानि ।
जानुजघनतुहिनाजिनवृजिनपनसमिथुनसोपानैः ॥ ४४ ॥

एते नपुंसकलिङ्गा भवन्ति[32] जान्वादिभिः सह । काकुदं तालु । आस्पदं प्रतिष्ठा । बाह्लवं परिष्कारजातम्[58] । दधि क्षीरविकारविशेषः । किण्वं सुराबीजम्[59] । श्राद्धं पितृक्रिया । यस्तु श्राद्धशब्दः अणन्तः व्युत्पाद्यते[60] श्रद्धा अस्यास्तीति स वाच्यलिङ्ग एव—श्राद्धा स्त्री, श्राद्धो नरः, श्राद्धं कुलम् । वाजपेयं यज्ञविशेषः । जानु अष्ठीवान् । जघनं अवयवविशेषः[61] । तुहिनं हिमम् । अजिनं चर्म । वृजिनं पापम् । पनसं वृक्षविशेषः[62] । मिथुनं युग्मम् । सोपानं आरोहणविशेषः ॥ ४४ ॥

द्वन्द्वश्मशानवेतन[63] ससैन्यचिह्नप्रधानधान्यानि ।
हर्म्यं शष्पं पापं त्रिविष्टपं त्रपुसमीपाभ्रम् ॥ ४५ ॥

सह सैन्येन वर्तत इति ससैन्यम् । ससैन्यं च तच्चिह्नं चेति । एते नपुंसकलिङ्गा भवन्ति[64] । द्वन्द्वं युगलम् । श्मशानं शवशयनम् । वेतनं[63] भृतिमूल्यम्[65] । सैन्यं सेना । चिह्नं लिङ्गम्[66] । प्रधानं श्रेष्ठम् । धान्यं व्रीहिः । हर्म्यं प्रासादः । शष्पं बालतृणम् । पापं अशुभम् । त्रिविष्टपं स्वर्गः[67] । त्रपु सीसम्[68] । समीपं निकटम्[69] । अभ्रं मेघः ॥ ४५ ॥

शिल्पं तल्पं रूपं तथान्तरीपं शफं च कुप्यं च ।
कुङ्कुमकुटुम्ब[70]कलभेध्मासिध्मयुग्मेन्द्रियैः सस्यम् ॥ ४६ ॥

शिल्पादयः नपुंसकलिङ्गा भवन्ति कुङ्कुमादिभिः सह, सस्यं च । शिल्पं क्रियाकौशलम् । तल्पं शयनं अट्टः[71] दाराश्च[71] । रूपं चक्षुर्विषयः[72] । अन्तरीपं मध्यजलो देशः[73] । शफं खुरः[74] । कुप्यं असारद्रव्यम्[75] । कुङ्कुमं सुगन्धिद्रव्यविशेषः[76] । कुटुम्बं[70] पुत्रादि । कलभं करिपोतः । इध्मं काष्ठम् । सिध्मं कुष्ठविकारः । युग्मं युगलम् । इन्द्रियं चक्षुरादि । सस्यं धान्यादि ॥ ४६ ॥

---

58 G बह्लवे भवं परिस्करजातम्, D बाह्लवं बिम्बपरिष्कारजातम् । 59 Vide Addi Notes. 60 G विश्लाध्यते (marginal em. विगृह्यते), D निष्पाद्यते । 61 D कट्यवयव° B नितम्बः । 62 G adds कुङ्कुणदेशे प्रसिद्धः । 63 B चेतन. 64 Om G. 65 B चेतः D भृतिः । 66 B ध्वजविशेषः । 67 B स्वर्गम् । 68 B शीशकम् । 69 G निकटः । 70 GD कुटम्ब. 71 D गुरोर्दाराश्च. 72 D चक्षुर्ग्राह्यविषयः । 73 D °जलोद्देशः B जलमध्यविशेषः । G adds बेट. 74 B खुरम् । 75 B आसवः । 76 GD सुगन्धद्रव्य° B सुगान्धाविशेषः ।

शिक्यं[77] हृदयं मद्यं भयसत्यापत्यराजसूयानि ।
धिष्ण्यं पण्यं मूल्यं कार्यं वीर्यं किसलयं[78] दम् ॥ ४७ ॥

एते नपुंसकलिङ्गा भवन्ति[79] । शिक्यं[77] उद्ग्रहणं भारयष्टिर्वा[80] । हृदयं मनः । मद्यं मदिरा । भयं त्रासः । सत्यं तथ्यम् । अपत्यं पुत्रादि[81] । राजसूयं यज्ञविशेषः । धिष्ण्यं गेहस्थानोडुवह्नयः[82] । पण्यं विक्रेयम्[83] । मूल्यं वसुपरिमाणम्[84] । कार्यं कृत्यम् । वीर्यं शक्तिः । किसलयं[78] पल्लवः[85] । दं कलत्रम् ॥४७॥

शिशिराम्बरीषपुष्करगह्वरकेयूरमुदरदुःखाग्रम् ।
चामरमक्षरमन्तरमश्रु द्वारं तथाऽगारम् ॥ ४८ ॥

एते नपुंसकलिङ्गा भवन्ति[86] । शिशिरं ऋतुविशेषः[87] । अम्बरीषं भ्राष्ट्रम्[88] । पुष्करं पद्मं तूर्यमुखं करिकराग्रं द्यौः[89] असिफलं च । गह्वरं गहनम् । केयूरं बाहुभूषणविशेषः[90] । उदरं जठरम् । दुःखं पीडा । अग्रं प्रान्तम् । श्रेष्ठवृत्तेस्तु वाच्यलिङ्गता—इयमग्रा, अयमग्रः[91], इदमग्रम् । चामरं चमरीवालव्यजनम् । अक्षरं वर्णः । अन्तरं मध्यम् । यस्तु अन्तरशब्दः बहिर्योगादौ तस्य सर्वनामत्वात्[92] वाच्यलिङ्गता—अन्तरा शाटी[93], अन्तरः पटः अन्तरं वस्त्रम् । अश्रु बाष्पम्[94] । द्वारं गृहमुखम् । अगारं गृहम् ॥ ४८ ॥

कुडयं स्फारं तक्रं क्षिप्रं क्षुद्रसकुकुन्दर[95] कुटीरम्[96] ।
पञ्जरकरीरचीवरचीरं पीयूषतीरे च ॥ ४९ ॥

सह कुकुन्दरेण[95] वर्तत इति सकुकुन्दरम्[95] । सकुकुन्दरं[95] च तत् कुटीरं चेति कर्मधारयः । क्षुद्रं च सकुकुन्दर[95]कुटीरं चेति समाहारो द्वन्द्वः । एते नपुंसकलिङ्गा भवन्ति । कुडयं भित्तिः । स्फारं विपुलम् । तक्रं मथितम्[97] । क्षिप्रं द्रुतम् । क्षुद्रं अल्पम् । अधमादौ वाच्यलिङ्गतैव । क्षुद्रः अधमः क्रूरश्च । क्षुद्रा नटी वेश्या[98] मधुमक्षिका च । कुकुन्दरं[95] कटिकूपम्[99] । कुटीरं[96] ह्रस्वकुटी[700] जघनं च । पञ्जरं

---

77 DD_1 सिक्यं. 78 BDD_1 किशलयं. 79 Om G. 80 G °ष्टिश्च and and adds in margin कावडी. 81 D पुत्रः. 82 B हर्म्यनक्षत्रयोः । 83 D विक्रेयद्रव्यम् । 84 D द्रव्यपरिमाणम् B विक्रेयग्रहणार्थद्रव्यम् । 85 B पल्लवम् । 86 Om G. 87 B adds तुहिनश्च. 88 D adds भाड. 89 Om B. 90 G अङ्गदम् । 91 Om B; D °मग्रतः । 92 G नामत्वात् । 93 Om G, B शटी, D साटी, 94 B नेत्राम्बम् । 95 DD_1 °ककुन्दर°: 96 D कटीरं. 97 B adds दधि. 98 B adds कण्टकारिका. 99 G कटिरूपम् । 700 Om D.

काष्ठादिरचनाविशेषः[1] । करीरं वंशाङ्कुरः वृक्षविशेषः[2] घटश्च । चीवरं वस्त्रविशेषः चीरं वासोविशेषः[3] । पीयूषं अमृतम् । तीरं तटम् ॥ ४९ ॥

अस्रा[4]श्रु स्मश्रु[5] कसेरु जत्रु तुम्बरु च शुक्रमभृगुसुते ।
अघमुत्तरीयमृक्षमुडावक्षं चेन्द्रिये यवसम् ॥ ५० ॥

एते नपुंसकलिङ्गा भवन्ति[6] । अस्रं[4] असृक्[7] । अश्रु बाष्पम् । स्मश्रु[5] मुखरोमाणि । कसेरु तृणविशेषः । जत्रु ग्रीवासन्धिः । तुम्बरु औषधविशेषः । शुक्रं रेतः ज्येष्ठमासः अग्निश्च । अभृगुसुते इति किम् ? शुक्रो भार्गवः । अघं पापम् । उत्तरीयं उपरिवासः । ऋक्षं नक्षत्रम्[8] । भल्लूकवचनस्य स्त्रीपुंस्त्वं चतुष्पद्जातित्वात्[9] । ऋक्षी, ऋक्षः । अक्षं इन्द्रियं लोचनादि[10] । यस्तु अक्षशब्दः बिभीतकादिवचनः[11] स पुंलिङ्गः षकारोपधत्वात्[12] । यवसं घासः ॥ ५० ॥

बिस[13]साहसबर्हाहःकिल्बिषकल्मष[14]पुरीषतूर्याणि ।
शकृता यकृता पृषता जगता चोदश्विता शीर्षम् ॥ ५१ ॥

एते नपुंसकलिङ्गा भवन्ति[15] शकृतादिभिः सह, शीर्षशब्दः [च] । बिसं[13] पद्ममूलम् । साहसं अनालोचितकरणम्[16] । बर्हं मयूरकलापः । अहः दिनम् । किल्बिषं अपराधः पापं[17] च[18] । कल्मषं पापम्[19] । पुरीषं विष्ठा । तूर्यं वाद्यविशेषः । शकृद् विष्ठा । यकृत् कालखण्डम्[20] । पृषद् बिन्दुः । जगत् त्रैलोक्यम् । उदश्वित् तक्रम् । शीर्षं मस्तकम् ॥ ५१ ॥

द्विस्वरमसन्तमिसुसन्तं त्रान्तं यच्छतादिका सङ्ख्या ।
द्विस्वरमन्नन्तमनान्तमकर्तरि कव्यकाव्ये च ॥ ५२ ॥

द्वौ स्वरौ यस्य तद् द्विस्वरम् । अस् अन्ते यस्य तद् असन्तम् । इस्[21] च उस् च इसुसौ । तौ अन्ते यस्य तद् इसुसन्तम् । त्रोऽन्ते यस्य तत् त्रान्तम् । शतमादिर्यस्याः सा शतादिका सङ्ख्या । द्वौ स्वरौ यस्य तद् द्विस्वरम् । मन् अन्ते यस्य तद् मन्नन्तम्[22] । द्विस्वरं च तद् मन्नन्तं चेति कर्मधारयः[23] । " ङणना ह्रस्वोपधाः

---

1 B पक्षिबन्धनविशेषः । 2 Vide Addi. Notes. 3 G तदेव. 4 BG अश्र° 5 Vide Addi. Notes. 6 Om G. 7 Om D, B क्षतजम् । 8 D उडुः । G adds उडौ बर्तमानम् । 9 Vide verse 82. 10 Om B. 11 B बिभीतकवचनः. 12 Vide verse 39. 13 G बिश. 14 G कलमख,, B कलुष, D कल्सुख, D कल्सुष. 15 Om G. 16 B °कारणं. D अन्वाचित°. 17,18 Om D. 19 B adds अघं च । 20 D कालेषण्डम् । 21 to 22 Missing in B. 23 Om GB.

स्वरे द्विः "[24] इति तस्य द्वित्वम्। अनोऽन्ते यस्य तद् अनान्तम्। अकर्तरीति कर्तुरन्यस्मिन्कारके कर्मादौ यः अनः विहित इत्यर्थः। भाववाचिनस्तु "कृद्भाव" इति वक्ष्यति[24a]। प्रसज्यप्रतिषेधे[25]ऽप्यदोष एव। कव्यं च काव्यं च कव्यकाव्ये। एते नपुंसकलिङ्गा भवन्ति[26]। द्विस्वरमसन्तं यथा—पयः, वयः, यशः, इति। इसन्तं यथा—सर्पिः, हविः[27] ज्योतिः,[28] इति। उसन्तं यथा—अरुः, यजुः, वपुः,[29] इति। त्रान्तं यथा—पत्त्रं,[30] मित्रं, सत्त्रं,[31] इति। शतादिका सङ्ख्या यथा—शतं, सहस्रं,[32] अयुतं, नियुतं, अर्बुदं, न्यर्बुदं, इति। द्विस्वरमन्नन्तं यथा—भस्म, जन्म, शर्म, इति। अनान्तं यथा—दीयते इति दानम्, पीयते[33] इति[33] पानम्, भक्ष्यते इति भक्षणम्,[34] यात्यनेन[35] इति यानम्[35], सम्यक् प्रदीयते यस्मै तत्संप्रदानम्, अपादीयते यस्मात्तद् अपादानम्, नीयतेऽस्मिन् इति नयनम्। "कथं राज्ञा भुज्यते इति राजभोजनी शाला,[36] राजभोजनः शालिः, इध्मं वृश्च्यतेऽनया अनेन वा इध्मव्रश्चनी स्त्री, इध्मव्रश्चनः पुमान्; पलाशानि[37] शात्यन्ते[38] अनया अनेन वा पलाशशातनी[39] यष्टिः, पलाशशातनो दण्डः; पूर्यतेऽनया अनेन वा पूरणी घटी, पूरणो घटः; गावो दुह्यन्तेऽस्यां अस्मिन् वा गोदोहनी घटी, गोदोहनो घटः ?" इति। टानुबन्धलिङ्गात्[40] सर्वविषयत्वमस्य प्रयोगानुसारेण। अकर्तरीति कर्तृविषयस्य वाच्यलिङ्गतैव—शृणोतीति[41] शर्मी स्त्री, शर्मा पुमान्, शर्म नपुंसकम्; नन्दयतीति नन्दना[42] स्त्री,[43] नन्दनः पुमान्, नन्दनं कुलम्। कव्यं पितृतर्पणम्[44]। काव्यं गद्यं पद्यं च ॥ ५२ ॥

धनवदनधनूरक्ताम्बरणविवरनयनमांसनामानि[45]।
जलहलजलकुसुमवियत्पत्तनवनलोहपर्णाख्यैः ॥ ५३ ॥

धनादिनामानि जलादिनामभिः सह नपुंसकलिङ्गानि भवन्ति[46]। धननाम[47]—धनं द्रविणं[48] वित्तम्। वदनं लपनम्[49]। धनुः शरासनं चापम्। रक्तं शोणितं

---

24 Vide Addi. Notes. 24a Vide verse 54. 25 GBD प्रसह्य°. 26 Om G. 27 BD वहिः. 28 GB द्योतिः. 29 G adds आयुः. 30 D पात्रं. 31 D शास्त्रं. 32 D adds लक्षं. 33 Om G. 34 D रक्ष्यते इति रक्षणं. 35 to 35 Om B. 36 G शालिः, B शालिनी. 37, 38 D पलाशो निशात्य°. 39 B °शातना. 40 Vide Addi. Notes; B टामिलिङ्गादयः 41 B शास्यतीति° D शृणोतीति शर्मा. 42 B नन्दनी. 43 D स्वस्त्री. 44 GB पितृतर्प्यम्। 45 B समरविवरनयनपिशितनामानि। 46 G स्युः 47 Om BD. 48 Om G; B adds निधानं, निधिः। 49 B आननं; G adds मुखं.

क्षतजम्। अन्नं अशनं भक्ष्यम्। रणं मृधं[50] सङ्ख्यं समरं[51] समीकम्[52]। विवरं रन्ध्रं श्वभ्रम्। नयनं नेत्रं अक्षि। मांसं पिशितं क्रव्यं पलम्। जलं पानीयं[53] तोयम्। हलं लाङ्गलं[54] गोदारकम्[55]। जलकुसुमनाम[56] यथा[56]—कमलं उत्पलं कुवलयं[57] सौगन्धिकम्। वियद् गगनं आकाशं अन्तरिक्षम्। पत्तनं नगरं अधिष्ठानम्। वनं विपिनं गहनं[58] काननम्। लोहशब्देन सर्वं[59] कंसादि गृह्यते[60]। लोहं[61] कालायसं अयः[62] कंसं[63] कनकं चामीकरं रूप्यं रुक्मं[64] कलधौतं ताम्रं शुल्वं[65] सीसम्[66]। पर्णं पलाशं[67] दलम्। सङ्ग्रामः[68] आहवः, अलन्तत्वात्[69] पुंलिङ्गता पूर्वविधिप्रतिषेधो न[70] ॥५३॥

फललोपधकृद् भावे समूहभावाक्रियासु यश्चान्यः।
प्रातिपदिकाजिरसुखवटकरोटभवृन्दकृच्छ्राणि ॥ ५४ ॥

फलमित्यर्थस्य[71] ग्रहणम्। फलशब्दस्य नपुंसकत्वात्[72]। ल उपधा यस्य स लोपधः। फलं च लोपधश्च कृच्चेति समाहारो द्वन्द्वः। भावे यः कृदिति भावशब्दः कृतैव सम्बध्यते[73]। फललोपधाभ्यां अर्थस्य अघटनात्। स च तव्यादिर्घुपर्यन्तः[74]। "आद्भ्यो य्व[75] दरिद्रातेः"[66] "शासुयुधिदृशिधृषि[76][77]मृषां वा" [कातन्त्र ४.५.१०४, १०५] इति स कृदव्ययो भाववत् प्रकाशते[78] इति अस्य ग्रहणं न। समूहश्च भावश्च क्रिया च तासु यो विहितोऽन्यस्तद्धित इत्यर्थः। एते, प्रातिपदिकादयश्च नपुंसकालिङ्गा भवन्ति[79]। फलवाचिनो यथा-बदर्याः फलं बदरम्। एवं नालिकेरं[80] खर्जूरं इत्यादयः। लोपधं यथा—कुलं बलं[81] तालु। भावे कृद् यथा—समन्तात् कटो[82] वर्तते, समन्ताद् रावो[83] वर्तते, साङ्कोटिनं[84], सांराविणम्[85]। "अभिविधौ[86] भावे इनुण्" [कातन्त्र ४.५.३९][87] ॥ योऽप्यण् तदन्तात् विहितः[88] सोपि[89] स्वार्थिकतया[90] तल्लिङ्गं न जहाति। समूहविषयं यथा—चाषाणां समूहः चाषम्। एवं

---

50 B द्वन्द्वं. 51 B शमनं. 52 B शमीकं, G समीकरणं. 53 D adds नीरं. 54 G adds शीरं. 55 D adds गोदारणं. 56 Om B. 57 D कुवलं. 58 B गह्वरं. 59 to 60 G सप्त धातवो दृश्यन्ते. 61 Om BG. 62 Om B. 63 D कांस्यं. 64 Om B. 65 GB शुल्बं. 66 D शीसं. 67 Om. B. 68. D adds अभ्यागमः 69 Vide verse 38; B अन्तरत्वात्। 70 B पुन्नपुंसकलिङ्गा भवन्ति ; D पूर्वविधिप्रतिषेधेन. 71 G °त्यर्थग्रहणं, B °त्यग्रहणं. 72 Vide Verse 71 where फल is mn. 73 D सम्पद्यते. 74 G तव्यादिषुपर्यन्तः. 75 D व्य. 76 D शासि. 77 G दृष्टि. 78 G प्रकाश्यते, B प्रकाशन्ते. 79. Om G. 80 B नारिकेलं, 81 B adds खलं(?). 82 Om B, G कारो. 83 D रवो. 84 B सम्पेटिनं. 85 B संराविणं. 86 D °विधं. 88 Om. GD. 89 B adds चणादि. 90 G स्वार्थैकतया.

काकं, वानस्पत्यं भैक्षम्[91] इत्यादीनां स्वभावात्[92] समूहवृत्तिः[93] नपुंसकत्वं च[94]। भावक्रियाविषयं यथा—वृक्षस्य भावः वृक्ष्यं[95], जडस्य भावः[96] जाड्यम्[97]। एवं पौरोहित्यं गार्हपत्यं सैनापत्यं[98] नार्ण्यं नारपत्यं[99] पाशुपत्यं इत्यादि यण् च प्रकीर्तितः[800]। अश्वस्य भावः क्रिया वा आश्वं,[1] उद्गातुर्भावः क्रिया वा औद्गात्रमेवमादिरिति[1a]। "प्राणभृज्जातिवयोवचनाद्[2] गोत्रादेः भावे क्रियायां वाण् च। [?][3]" यः —सख्युर्भावः[4] क्रिया वा सख्यम्[5]। एवं[6] ज्ञातेयं[6], रमणीयस्य भावः रामणीयकं,[7] इत्यादीनां अभिधानादेव नपुंसकत्वं सिद्धम्। प्रातिपदिकं शब्दविशेषसंज्ञा[8]। अजिरं प्राङ्गणम्[9]। सुखं शर्म। वटं अपूपविशेषः। करोटं भाजनम्[10]। भं नक्षत्रम्। वृन्दं समूहः। कृच्छ्रं कष्टम्॥ ५४॥

षष्ठ्यन्तात्संज्ञायां कन्था चोशीनरेषु[11] तत्पुरुषे।
आदावुपक्रमोपज्ञे स्वाम्यर्थात्सभाऽराज्ञः॥ ५५॥

षष्ठ्यन्तात्परा कन्था तत्पुरुषे समासे उशीनरदेशे संज्ञायां विषये नपुंसकलिङ्गा भवति। उपक्रमश्च उपज्ञा च उपक्रमोपज्ञे। गमकत्वाद् अल्पस्वरस्य[12] परनिपातः। षष्ठ्यन्तात् परं[13] उपक्रम उपज्ञा च तयोरादित्वे गम्यमाने[14] तत्पुरुषे नपुंसकलिङ्गे भवतः। स्वाम्यर्थात् षष्ठ्यन्तात् राजवर्जितात् परा सभा तत्पुरुषे नपुंसकलिङ्गेति। सौसमेः कन्था सौसमिकन्थम्[15]। नन्दोपक्रमाणि मानानि। कातन्त्रोपक्रमं[16] कालापकं व्याकरणम्। चन्द्रोपज्ञं[17] असंज्ञकं[18] व्याकरणम्। स्वामिसभं ईश्वरसभं इनसभम्[19]। अराज्ञ इति किम्? राजसभा। कथं नृपतिसभामगमद् इति। नृपतौ सभा नृपतिसभा। सप्तम्यन्तात्[20] सभा॥ ५५॥

---

91 D भैक्ष्यं, G adds यौवतं. 92 Om B. 93 B °हविवर्तनी. 94 to 99 Missing in B. 95 D वृक्षत्वं, 96 G adds कर्म वा जड्यं. 97 D जडत्वं. 98 GD. सेनापत्यं. 99 D adds कारपत्यं. 800 Vide Addi. Notes. 800 to 1a Missing in B. 1 D adds छात्रस्य भावः क्रिया वा छात्रं, कौमारं; G adds कैशोरं. 2. B प्राणिभिर्जाति.° 3 B गोत्रादेः अर्थस्य भावक्रियायां°, G °क्रियायां च यः। 4 B संख्याता भावः. 5 B संख्यातः 6 Om B. 7 Vide Addi. Notes. 8 G शब्दविषयसंज्ञा and adds "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।" 9 B अङ्गनम्. 10 B भाजनविशेषः 11 D चोसीनरेषु. 12 B अन्यस्वरस्य, D गमकत्वात् यावुपज्ञोपक्रमौ अनयो. आदिमत्त्वे गम्यमाने वा ईदृशं गद्यं(?) नास्वरस्यापि. 13 D अन्त्यस्वरे. 14 D तयोरादित्वं गम्यते. 15 B शार्मिकी कन्था यस्यासौ शार्मिकिकन्थम्। 16 G पाणिन्युपज्ञं, B पाणिन्युपक्रमं. 17, 18 D चन्द्रोपक्रमसंज्ञकं. 18 B कातन्त्रव्या°. 19 Om D. 20 B समस्तात्(?)

अमनुष्यात्[21] सभाऽशाला सेनाशालासुरानिशा वा स्युः ।
छाया[22] च तथा नित्यं बाहुल्येऽप्यव्ययात्पन्थाः ॥५६॥

मनुष्यादन्यस्मात् षष्ठ्यन्तात्परा सभा अशालारूपा नपुंसकलिङ्गा भवति । षष्ठ्यन्तात्पराः सेनादयश्च तत्पुरुषे विभाषया नपुंसकलिङ्गा भवेयुः । छाया च विभाषया भवेत् । बाहुल्येऽपि छाया नित्यं नपुंसकलिङ्गा भवति । अव्ययात्परः पन्थाः तत्पुरुषे[23] नपुंसकलिङ्ग इति । यथाक्रममुदाहरणम् । पिशाचसभं, राक्षससभम्[24] । मनुष्यसदृशग्रहणात्[25] काष्ठसभा । स्त्रीलिङ्गमेव । गोपालसभा[26] गोपालानां समूहः इत्यर्थः । इह न भवति—अनाथसभा अनाथकुटीत्यर्थः । ब्राह्मणसेनं ब्राह्मणसेना । गोशालं गोशाला । यवसुरं यवसुरा । श्वनिशं[27] श्वनिशा[28] । कुड्यच्छायं[29] कुड्यच्छाया[30] । इषुच्छायं[31], शलभच्छायम्[32] । पूर्वपदस्यात्र बहुलत्वं गम्यते । अपथं, उत्पथम् । तत्पुरुषे इति किम् ? सुपथा नगरी, उत्पथो देशः ॥ ५६ ॥

सुदिनात्पुण्यादेकाच्चाह्नः संख्यापरो[33]ऽपि रात्रिश्च ।
गृहशशपूर्वे स्थूणोर्णे च नपुंसकमिति समाप्तम्[34] ॥ ५७ ॥

सुदिनशब्दात्पुण्यश[35]ब्दादेकशब्दाच्च परोऽहन्शब्दः अतप्रत्ययान्तः,[36] संख्यापरोऽपि रात्रिशब्दः अतप्रत्ययान्तः,[36] नपुंसकलिङ्गः भवति । गृहं च शशश्च, तौ[37] पूर्वौ ययोः स्थूणोर्णयोः इति गृहपूर्वा स्थूणा शशपूर्वा ऊर्णा च नपुंसकलिङ्गे[38] भवतः[38] । सुदिनं च तदहश्च सुदिनाहम् । सुदिनमिह[39] पुण्यं उच्यते । एवं पुण्याहं, एकाहम्[40] । एका चासौ रात्रिश्च एकरात्रम् । द्वयोः रात्र्योः समाहारः द्विरात्रम् । एवं[41] पञ्चरात्रम्[42] । गृहस्य स्थूणा गृहस्थूणं गृहधारणम् । शशस्योर्णा शशोर्णं शशलोम॥५७॥

इति[43] लिङ्गवृत्तौ[44] नपुंसकलिङ्गव्याख्यानं[45] समाप्तम् ॥

---

21 GBDD¹ °ष्याच्चः 22 D_1 छाया माया नित्यं, D छाया माया च नित्यं, cf verse 13– छाया माया... 23 B adds विभाषया. 24 Om B. 25 G मनुष्यासदृ°. 26 D °सभं. 27, 28 GD स्व° 29, 30 D कुटीच्छा°. 31 BD add इषुच्छाया. 32 Om B, D adds शलभच्छाया. 33 D संख्यापूर्वोपरोपि. 34 DGB नपुंसकलिङ्गा इति समाप्ताः । 35 G om पुण्यशब्दात् । 36 D अप्रत्य° 37 D चैतौ. 38 BD °लिंगा भवन्ति । 39 G °मिति. 40 Om BD. 41 to 42 Om B. 42 Om D. 43 Om D. 44 Om BD. 45 G °लिंगशब्दव्या°, B नपुंसकव्या°, D नपुंसकलिङ्गं.

अथोभयलिङ्गवाचकाः शब्दा व्याख्यायन्ते ।*

[४. पुन्नपुंसकलिङ्गप्रकरणम् ।]

मालकसरकानीकाः[46] पुस्तकमस्तकचरकचषकनिष्काः ।
पिण्याकशूकमोदकमञ्चकनटपङ्ककल्कानि[47] ॥ ५८ ॥

एते शब्दाः[48] पुन्नपुंसकलिङ्गा भवन्ति । वक्ष्यते[49] "उभयलिङ्गा इति समाधाः ।" इति, तेनायं सम्बन्धः सिद्धो भवति । तथा स्त्रीनपुंसकेष्वपि बोद्धव्यम्[50] ॥ मालकः मालकं ग्रामान्तरालाटवी[51] । सरकः सरकं[52] मद्यादिपानम्[53] । अनीकः अनीकं युद्धम् । पुस्तकः पुस्तकं लिखितपत्रसञ्चयः[54] । मस्तकः मस्तकं शिरः । चरकः चरकं शास्त्रविशेषः[55] । चषकः चषकं मद्यभाण्डविशेषः । निष्कः निष्कं सुवर्णाष्टशतं[56] पलं उरोभूषणं च । पिण्याकः पिण्याकं श्च्युततैलकल्कविशेषः[57] । शूकः शूकं[47] धान्यादेः सूची[58] । मोदकः मोदकं भक्ष्यविशेषः । मञ्चकः मञ्चकं शयनविशेषः[58a] । नटः नटं नर्तकविशेषः । पङ्कः पङ्कं कर्दमः[59] । कल्कः कल्कं तिलादेः[60] उद्धृततैलादिकठिनविशेषः[61] ॥ ५८ ॥

वल्मीकशाकशाटकपिनाकमूषिककरण्डकं[62] शुल्कम्[63] ।
करकनखतण्डकशकटकर्पटपातककिरीटपटाः ॥ ५९ ॥

वल्मीकादौ[64] समाहारो द्वन्द्वः । अपरार्धे[65] इतरेतरयोगः । एते शब्दाः[66] पुन्नपुंसकलिङ्गा भवन्ति[67] । वल्मीकः वल्मीकं पिपीलिकाकृतो मृत्सञ्चयविशेषः[68] । शाकः[69] शाकं भक्ष्यविशेषः[70] । शाटकः[71] शाटकं[72] वस्त्रविशेषः । पिनाकः पिनाकं रुद्रायुधविशेषः[73] । मूषिकः[74] मूषिकं[74] आखुः[75] । करण्डकः करण्डकं पुष्पादीनामा-

---

* BD om this sentence. 46 B °शरका°. 47 G °सूक°. 48 Om B. 49 D वक्षति, vide verse 79. 49 to 50 Om G. 51 G °रालेऽटवी, D °राटवी. 52, 53 B शरकः शरकं मद्यादिपानपात्रम् । 54 G °चयविशेषः । 55 G वैद्यकग्रन्थः । 56 B °ष्टपणशतं उरोभूषणम् । G adds धान्याष्टकं शतोपेतं. 57 G श्रुत°, B तिल°, D श्रुततिल°. 58 शूची सूकलम् । B धान्यादयः । D धन्यादेः सूकलम् । 59 B कर्दमविशेषः पापं च । 60 G तैलादेः. 61 उद्धृततैलपानविशेषः, G उद्धृतकठिनविशेषः औषधादीनां च. 62 D साटक. 63 G मूषकः 64 DB शुल्कादौ. 65 B अपरविभागे. 66 Om D. 67 Om G. 68 B मृत्तिसञ्चय. 69 to 72 Missing in G. 70 B द्वीपान्तरे । शाकः हरीतके चापि । 71, 72 D साटक° 73 G रुद्रायुधं. 74 G मूषक°. 75 Om D.

धारविशेषः[76]। शुल्कः शुल्कं मार्गादिदण्डमानम्[77]। करकः करकं कमण्डलुः। नखः नखं कररुहम्[78]। तण्डकः तण्डकं छन्दोगब्राह्मणग्रन्थविशेषः[79]। शकटः शकटं बलीवर्दादिवाह्योद्वहनविशेषः[80]। कर्पटः कर्पटं वस्त्रविशेषः[81]। पातकः पातकं ब्रह्महत्यादि[82]। किरीटः किरीटं मुकुटम्। पटः पटं वस्त्रम्[83] ॥ ५९ ॥

निकटकटकपटकूटा भूषणकुटकुञ्जकुष्ठनडमुष्काः।
द्रोणक्ष्वेडिततीर्थप्रोथाष्टापदकबन्धानि ॥ ६० ॥

एते पुन्नपुंसकलिङ्गा भवन्ति[84]। निकटः निकटं समीपम्। कटः कटं आसनविशेषः[85]। कटी श्रोणी, नदादित्वात्[85] ई, विशिष्ट एवार्थे[86]। कपटः कपटं व्याजः। कूटः कूटं राशिः। भूषणः भूषणं अलङ्कारः। कुटः[87] कुटं[87] घटः[88] हलाङ्गविशेषश्च[89]। कुञ्जः कुञ्जं गह्वरम्[90]। कुष्ठः कुष्ठं गन्धद्रव्यविशेषः[91]। नडः नडं नड्वलजस्तृणः[92]। मुष्कः मुष्कं अश्वादीनां परिमाणविशेषः[93] वृषणश्च[94]। द्रोणः द्रोणं परिमाणविशेषः[95]। द्रोणी तु नदादित्वात्[85] ई, जलक्षेपणी। क्ष्वेडितः क्ष्वेडितं सिंहनादविशेषः[96]। तीर्थः तीर्थं पुण्यस्थानम्[97]। प्रोथः प्रोथं अश्वादेः घोणान्तरम्[98]। अष्टापदः अष्टापदं सुवर्णं चतुरङ्गादिद्यूतफलकं[99] च। कबन्धः कबन्धं शिरोरहितकायः ॥ ६० ॥

शृङ्गोद्योगतडागक्रकचध्वजपुच्छकूर्चकवचानि।
अर्बुदयौवनभुवनं सौधं सीधु व्रतं सक्तुः ॥ ६१ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति। शृङ्गः शृङ्गं विषाणम्[100]। उद्योगः उद्योगं पराक्रमः[1]। तडागः तडागं जलाधारविशेषः। क्रकचः क्रकचं करपत्रम्। ध्वजः ध्वजं चिह्नविशेषः। पुच्छः पुच्छं लाङ्गूलः। कूर्चः कूर्चं दीर्घश्मश्रु[2]। कवचः कवचं तनुत्रम्[3]। अर्बुदः अर्बुदं दशकोट्यः[4]। यौवनः यौवनं द्वितीयं वयः। भुवनः भुवनं लोकः।

---

76 Vide Addi. Notes. 77 B °दिषु दण्ड.° 78 Om B. 79 G छन्दार्थो ब्रा°, B छन्दार्थो ब्राह्मणः. 80 G अनः 81 G अल्पोपकरणविशेषः स्थानविशेषश्च, D अल्पोपकरणस्थानविशेषः 82 Om G. 83 D वस्त्रविशेषः. 84 om. G. 85 Vide Addi. Notes. 85 to 86 Missing in B. 86 G एवार्थः 87 B कूट°. 88 B गृहं. 89 G लांगलविशेषः, Om B. 90 B पिहितोदरः. 91 B adds रोगश्च. 92 D °णं, G °णविशेषः 94, 95 Om B. 96 B °नादः 97 B पुण्यजलं. 98 B °न्तरविशेषः 99 B om फलकं च, D °फलं च. 900 विषाणः 1 Vide Addi. Notes. 2 G श्मश्रु. 3 G तनुत्राणम्। 4 B °दिः

सौधः सौधं धवलगृहम् । सीधुः सीधु मद्यम् । व्रतः व्रतं ब्रह्मचर्यादिनियमः[5] । सक्तुः सक्तु यवादिविकारः[6] ॥ ६१ ॥

द्यूतप्रयुतैरावतवसन्तककुदौषधमधुमहिमानि ।
पुस्तं बुस्तं हस्तं वास्तु च मुस्तं व्रजं रजतम् ॥ ६२ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । द्यूतः द्यूतं दुरोदरम्[7] । प्रयुतः प्रयुतं दशलक्षाणि[8] । ऐरावतः ऐरावतं महेन्द्रवाहनो गजः[9] । वसन्तः वसन्तं ऋतुविशेषः[10] देवपुत्रविशेषश्च[11] । ककुदः ककुदं प्राधान्यं[12] राजलिङ्गं[13] च । औषधः औषधं भेषजम् । मधुः मधु मृद्वीकादिमद्यम्[14] । महिमा महिम महत्त्वम् । पुस्तः पुस्तं लेप्यादिकर्मविशेषः[15] । बुस्तः बुस्तं पक्वमांसविशेषः । हस्तः हस्तं करः[16] । वास्तुः वास्तु गृहम्[17] । मुस्तः मुस्तं ओषधिविशेषः । व्रजः व्रजं पन्थाः[18] गोष्ठं[19] निवहः[20] च । रजतः रजतं रूप्यं[21] श्वेतं च ॥ ६२ ॥

कार्षापणव्रणस्थाणुबाणतृणचरणतोरणरणानि ।
शतलोहितघृतवृत्तानि गूथयूथायुतं मण्डम् ॥ ६३ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । कार्षापणः कार्षापणं हिरण्यप्रमाणं पुराणम्[22] । व्रणः व्रणं क्षतम् । स्थाणुः स्थाणु छिन्नद्रुमशिर ऊर्ध्वकाष्ठमेवं[23] । बाणः बाणं शरः पुष्पविशेषश्च[24] । तृणः तृणं शष्पम् । चरणः चरणं पादः । तोरणः तोरणं निर्यूहः[25] । रणः रणं युद्धम् । शतः शतं संख्याविशेषः । लोहितः लोहितं शोणितम् । गुणवचनस्य तु वाच्यलिङ्गता । लोहिता शाटी,[26] लोहितो गौः, लोहितं वस्त्रम् । घृतः घृतं आज्यम् ।वृत्तः वृत्तं शीलं निस्तलं च[27] । गूथः गूथं विष्ठा । यूथः यूथं पशुसमूहः । अयुतः अयुतं दशसहस्राणि । मण्डः मण्डं भक्तादेर्निर्यासः ॥ ६३ ॥

खण्डं मुण्डं कुण्डं काण्डं दण्डं सुवर्णव्रणौ च ।
चन्दनमोदनमसनं[28] विमानधनभवनमुद्यानम् ॥ ६४ ॥

---

5 G नियमः 6 B यवविकारविशेषः, D यवादिविकारविशेषः 7 BD दुरोदरः 8 B °क्षं. 9 B adds इन्द्रधनुः 10 G ऋतुः 11 Om D. 12 G प्रधानं. 13 G राजचिह्नं. 14 Vide Addi. Notes. 15 B लेपकर्म°, D लेपकर्म°. 16 B करविशेषः. 17 B adds यत्र पुण्यांशेन देवतानां विन्यासः स वास्तुः । 18 Om B. 19 D गोष्ठा. 20 B गोविषाणः 21 G रौप्यम् । 22 Om D. 23 °द्रुमविश्वृत्तकाष्ठ°, G adds रुद्रः 24, 25 Vide Addi. Notes 26 GD साटी. 27 Om BD, G निस्तुलं च वृत्ताकारं च. 28 GBD °मशनं.

एते पुन्नपुंसकलिङ्गा भवन्ति। खण्डः खण्डं इक्षुविकारविशेषः शकलं च। खण्डनक्रियावाचिनस्तु वाच्यलिङ्गता। खण्डा घटी, खण्डो घटः, खण्डं कुण्डम्। मुण्डः मुण्डं शिरः। गुणवचनस्य तु द्रव्ये वर्तमानस्य वाच्यलिङ्गतैव। यथा—मुण्डनगुणयोगात्[29] मुण्डा स्त्री, मुण्डः पुमान्, मुण्डं कुलम्। कुण्डः कुण्डं जीवति भर्तरि परजातः अग्निहवनाधारविशेषः[30] च। काण्डः काण्डं शरः[31]। दण्डः दण्डं दमनार्थो निग्रहः। सुवर्णः सुवर्णं कनकम्। वर्णः वर्णं नीलादि। अर्चितत्वात् द्वन्द्वे सुवर्णस्य पूर्वनिपातः[32]। चन्दनः चन्दनं मलयजः[33]। ओदनः ओदनं भक्ष्यविशेषः। असनः[28] असनं[28] वृक्षविशेषः[34]। विमानः विमानं रथविशेषः[35]। धनः धनं द्रव्यम्। भवनः भवनं गृहम्। उद्यानः उद्यानं आरामः॥ ६४॥

निधनं पिधानमभिधानं मानं दिनखलीननालानि।
पुलिनं नलिनं स्तेनं शयनासनयाननिगडानि॥ ६५॥

एते पुन्नपुंसकलिङ्गा भवन्ति। निधनः निधनं विनाशः कुलं[36] च[36]। पिधानः पिधानं संवरणम्। अभिधानः अभिधानं नाम[37] शब्दश्च। मानः मानं दर्पः। दिनः दिनं दिवसः[38]। खलीनः खलीनं कविका[39]। नालः नालं पद्मादीनां दण्डः। पुलिनः पुलिनं सैकतम्[40]। नलिनः नलिनं पद्मम्। स्तेनः स्तेनं चौर्यं चौरश्च[41]। शयनः शयनं शय्या। आसनः आसनं उपवेशनम्। यानः यानं वाहनम्। निगडः निगडं बन्धनविशेषः[42]॥ ६५॥

मण्डपकुतपद्वीपा[43] दीपविटप[44] शूर्पजम्बुबिम्बानि।
आश्रमसङ्क्रमसङ्गमहिमकर्मब्रह्मलोमानि॥ ६६॥

एते पुन्नपुंसकलिङ्गा भवन्ति। मण्डपः मण्डपं गृहादेः विन्यासविशेषः[45]। कुतपः कुतपं छागरोममयो वस्तुविशेषः[46]। द्वीपः द्वीपं द्विधा[47] गता आपो यत्र। दीपः दीपं प्रकाशविशेषः। विटपः विटपं लतासमुदायविशेषः। शूर्पः[44] शूर्पं[44] मानविशेषः। जम्बुः जम्बु वृक्षविशेषः। बिम्बः बिम्बं आकृतिः। आश्रमः आश्रमं स्थानम्। सङ्क्रमः

---

29 Om B. 30 Om B; G om जीवति भर्तरि परजातः and adds लोकेषु प्रसिद्धं वा मृद्घटितं कुण्डम्। 31 G बाणः अवसरश्च. 32 Vide Addi. Notes. 33 D °यजम्। 34 D भक्ष्यविशेषः 35 B यानविशेषः 36 Om G. 37 Om D. 38 D वासरः 39 G कविकं अश्वस्यमुखबन्धनं D सैकततटं. 41 G चोरश्च. 42 G बन्धनं- 43 D °द्वीपदीप°, D_1 °द्वीपं. 44 $GBDD_1$ सूर्पं. 45 G गृहाद्बहिर्विन्यास° 46 Dछागरोमजो वस्त्रवि° 47 G द्विविधा.

सङ्क्रमं जलतरणविशेषः[48] । सङ्गमः सङ्गमं सङ्गतिः । हिमः हिमं तुहिनम् । अर्थं कर्मा इदं कर्म । ब्रह्मा ब्रह्म प्रजापतिः । लोमा लोम तनूरुहम् ॥ ६६ ॥

गुल्मोऽर्मोद्यमकुट्टिमदाडिममध्यमलयाम्बुजक्षेमाः ।
चक्रमरण्यं कुल्यं शल्यं गोमयकषायौ च ॥ ६७ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । गुल्मः गुल्मं प्रकाण्डं[49] उपस्करणं[50] रोगः[51] च । अर्मः अर्मं चक्षूरोगविशेषः[52] । उद्यमः उद्यमं उत्साहः । कुट्टिमः कुट्टिमं संस्कृतभूमिविशेषः[53] । दाडिमः दाडिमं फलविशेषः । मध्यः मध्यं अन्तरम्[54] । मलयः मलयं पर्वतविशेषः । अम्बुजः अम्बुजं कमलम् । क्षेमः क्षेमं कुशलम्[55] । चक्रः चक्रं रथाङ्गं राष्ट्रं च । अरण्यः अरण्यं वनम् । कुल्यः कुल्यं अस्थि जलपथं च । शल्यः शल्यं वंशादीनां शलाकाविशेषः[56] । गोमयः गोमयं गोशकृत् । कषायः कषायं रसविशेषः ॥ ६७ ॥

समयकवियवलयाव्ययदारुप्रतिसरयुगन्धरक्षीरम् ।
सूत्रं छत्रं वक्त्रं वस्त्रं पत्रं पवित्रं च ॥ ६८ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । समयः समयं कालः । कवियः कवियं अश्वमुखबन्धनम्[57] । वलयः वलयं हस्ताभरणविशेषः । अव्ययः अव्ययं असंख्यशब्दविशेषः[58] । दारुः दारु काष्ठम् । प्रतिसरः प्रतिसरं सूत्रं[59] वाहिनीजघनं च । युगन्धरः युगन्धरं कूबरः[60] । क्षीरः क्षीरं दुग्धम् । सूत्रः सूत्रं तन्तुः[61] सूत्रणं[62] च । छत्रः छत्रं आतपत्रम् । वक्त्रः वक्त्रं मुखम् । वस्त्रः वस्त्रं वसनम् । पत्रः पत्रं पर्णं वाहनं[63] च । पवित्रः पवित्रं पावनम्[64] ॥ ६८ ॥

नेत्रं वज्रं वप्रं राष्ट्रं वासरशरीरतिमिराणि ।
कुञ्जरसमरोशीरा विहारवारान्धकाराणि ॥ ६९ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । नेत्रः नेत्रं नयनं परिधानविशेषश्च[65] । वज्रः वज्रं कुलिशम् । वप्रः वप्रं क्षेत्रम् । राष्ट्रः राष्ट्रं जनपदः[66] । वासरः वासरं दिनम् ।

48 Om D. 49 G अप्रकाण्डं, Om B. 50 Om B. 51 D उपकरणं वा । 52 GD चक्षु° 53 G बद्धभूमि° D सुधादिसंस्कृत°. 54 G उदरं अंगविशेषः । 55 D adds लब्धपरिरक्षणं. 56 G शंकुविशेषः 57 Vide Addi. Notes. 58 G असंख्या°. 59 D हस्त (or हेम्नः?) सूत्रं. 60 D भूधरः, B भूधरविशेषः 61 G तन्तुविशेषः 62 Om B. 63 Om B. 64 Vide Addi. Notes. 65 G वस्त्रविशेषः 66 B जनपदविशेषः.

शरीरः शरीरं देहः। तिमिरः तिमिरं तमः। कुञ्जरः कुञ्जरं गजः[67]। समरः समरं रणः[68]। उशीरः उशीरं वीरणीमूलं[69] नलदम्[70]। विहारः विहारं भिक्षुस्थानम्। वारः वारं परिपाटिः। अन्धकारः अन्धकारं तमः॥ ६९॥

अङ्गारशिखरतोमरसहस्रपार्श्वं शरावगाण्डीवौ[71]।
काशा[72]काशकुशाङ्कुशकोशप्रग्रीवपात्रीवाः॥ ७०॥

एते पुन्नपुंसकलिङ्गा भवन्ति। अङ्गारः अङ्गारं वह्निदग्धशकलम्। शिखरः शिखरं अग्रम्। तोमरः तोमरं आयुधविशेषः। सहस्रः सहस्रं दशशतानि। पार्श्वः पार्श्वं शरीरैकदेशः। शरावः शरावं वर्धमानाख्यम्। गाण्डीवः[71] गाण्डीवं[71] चापविशेषः[73]। काशः[72] काशं[72] तृणविशेषः। आकाशः आकाशं नभः[74]। कुशः कुशं बर्हिः[75]। अङ्कुशः अङ्कुशं गजवारणम्[76]। कोशः कोशं धनम्। प्रग्रीवः प्रग्रीवं वास्तुनिमित्तकारणम्[77]। पात्रीवः पात्रीवं यज्ञोपकरणम्॥ ७०॥

भावं दैवं ताण्डवमथ वल्कलमूलमुसल[78]कललानि।
शीलफलकमलमङ्गलकमण्डलुबलोपलपलालम्॥ ७१॥

एते पुन्नपुंसकलिङ्गा भवन्ति। भावः भावं स्वभावः शब्दविषयेऽभिप्रायः[79] आत्मा योनिश्च। दैवः दैवं विधिः। ताण्डवः ताण्डवं नृत्यं तृणविशेषश्च। वल्कलः वल्कलं वृक्षादीनां त्वक्[80]। मूलः मूलं प्रतिष्ठा। मुसलः[78] मुसलं[78] आयुधविशेषः क्षोदनविशेषश्च[81]। कललः कललं शुक्रशोणितादेरीषद् घनपरिणामः[82]। शीलः शीलं चरितम्[83]। फलः फलं प्रयोजनं कुसुमादिसम्भवश्च। कमलः कमलं पद्मम्। मङ्गलः मङ्गलं प्रशस्तम्[84]। कमण्डलुः कमण्डलु करकम्। बलः बलं प्राणः[85]। उपलः उपलं शिला। पलालः पलालं धान्यादेः शुष्कनालम्॥ ७१॥

कुण्डलतमालतैलं शकलमृणालतलमलचषालानि[86]।
शूलप्रवालशम्बल[87]शाल[88]निगडयूषमेषाणि॥ ७२॥

---

67 B हस्ती. 68 G रणं. 69 Om D, B, वीरण°. 70 Om B 71 D गांजीव 72 DD_1 कास° 73 G adds अर्जुनचापं, D चापविकासः 74 D नभसः 75 G adds दर्भं 76 B °वारणविशेषः 77 B वस्तु, D °वारणं, G adds प्रग्रीवो मत्तवारणे. 78 DD^1 मुशल° 79 B सत्तायोनिराशाभिप्रायः, GD आत्मयोनिश्च, B om आत्मा यो° 80.B त्वग्विशेषः 81, 82 Vide Addi. Notes 83 B चरित्रं, D सुचरितं. 84 B शुभं. 85 B प्राणाः 86 DD_1 चखा° 87 DD_1 B सम्बल. 88 DD_1 साल°

एते पुन्नपुंसकलिङ्गा भवन्ति । कुण्डलः कुण्डलं कर्णाभरणविशेषः[89] । तमालः तमालं वृक्षविशेषः[90] । तैलः तैलं तिलादीनां[91] विकारः[91] स्नेहः । शकलः शकलं खण्डम्[92] । मृणालः मृणालं बिसं,[93] तदङ्कुर इत्येके । तलः तलं मूलं अधोरूपं च[94] । मलः मलं कलङ्कः पुरीषं[95] च[95] । चषालः चषालं यज्ञपात्रम्[96] । शूलः शूलं प्रहरणविशेषः[97] रोगविशेषश्च[98] । प्रवालः प्रवालं नवकिसलयविशेषः[99] । शम्बलः[87] शम्बलं[87] पाथेयम् । शालः[88] शालं[88] वृक्षविशेषः । निगडः निगडं बन्धनविशेषः[1000] । यूषः[1] यूषं मांसादिरसविशेषः[2] । मेषः मेषं मेण्ढकः[3] ॥ ७२ ॥

कर्षकरीषामिषविषवर्षैर्माषं च मासमांसं च ।
कर्पासदिवसचिक्कसकंसांसरसचमसैर्जृम्भः ॥ ७३ ॥

एभिः सहैते पुन्नपुंसकलिङ्गा भवन्ति । कर्षः कर्षं पलचतुर्थो भागः[4] । करीषः करीषं गोमयाग्निः[5] । शुष्कगोमयसंघात इत्येके । आमिषः आमिषं मांसम् । विषः विषं शृङ्गादिद्रव्यविशेषः[6] । वर्षः वर्षं संवत्सरः । माषः माषं परिमाणविशेषः व्रीहिविशेषः[7] च । मासः मासं कालपरिमाणविशेषः[8] । मांसः मांसं पिशितम् । कर्पासः कर्पासं तूलकारणम् । दिवसः दिवसं दिनम् । चिक्कसः चिक्कसं यवान्नविशेषः[9] । कंसः कंसं लोहविशेषः[10] परिमाणविशेषश्च । अंसः अंसं स्कन्धः । रसः रसं मधुरादिः शृङ्गारादिः विषं वीर्यं रागश्च । चमसः चमसं यज्ञपात्रविशेषः । जृम्भः जृम्भं जृम्भणम् ॥ ७३ ॥

अवतंससानुनिर्यासान्यु[11]पवासापराह्णगृहगेहाः ।
दैवतकुमुदार्धर्चाः शतमानं वारबाणं[12] च ॥ ७४ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । अवतंसः अवतंसं शेखरम्[13] । सानुः सानु पर्वतैकदेशः[14] । निर्यासः निर्यासं वृक्षादेर्निस्यन्दः[15] । उपवासः उपवासं भोजनादेर्विच्छेदः[16] । अपराह्णः अपराह्णं दिवसापरार्धभागः[17] । गृहः गृहं वासः[18] । गेहः गेहं मन्दिरम्[19] । " काला-

89 G कर्णाभरणं. 90 G खण्डं. 91 Om G. 92 G नेम. 93 GBD बिशं. 94 B तरलः तरलं चञ्चलं. 95 Om B, D पुरीषादि. 96 Om D, B °पात्रविशेषः, G adds यूपकटकं. 97 G आयुधं 98 Om B, G रोगश्च. 99 Om D, G पल्लवम्. 1000 G बंधविशेष', Om D. 1 to 2 Om D. 3 G मेण्ढ्रकः 4 B पलस्य चतु°, G adds षोडशमाषो निगद्यते कर्षः । 5 G adds छगणचूर्ण. 6 D शृगा°. 7 Om D. 8 Om D, G कालसंख्या. 9 G adds यवक्षोदे तु चिक्कसः । 9 to 11 Om B. 10 G धातुद्रव्यविशेषः 11 GBD °र्यासोपवा° D_1 °र्यासोणुप° 12 GB वारवाणं. 13 GBD शेषरं. 14 G शिखरं. 15 B निःष्य (D स्य)न्दः 16 B भोजनच्छेदः 17 B दिवसस्याप°, D °र्धविभागः 18 B मन्दिरं. 19 B वेश्म.

गरुप्रततधूपवहाश्च गेहा: "[20]। दैवत: दैवतं देवता। कुमुद: कुमुदं कैरवम्। अर्धं चासौ ऋक् च, अर्धर्च: अर्धर्चं, समासान्तोऽत्[21] | शतं मानानि[22] अस्य, शतमान: शतमानं भूभागविशेष:। वारबाण:[23] वारबाणं[23] कञ्चुकम्॥ ७४॥

जलजौ च शङ्खपद्मौ भूत:[24] प्रेते च [25] सैन्धवो लवणे।
उत्कर्षे सारोऽयं नैतत्सारं त्विदं न्याय्ये॥ ७५॥

जले जातौ शङ्खपद्मौ उभयलिङ्गौ भवत:। शङ्ख: शङ्खं, पद्म: पद्मम्। निधिवचनोऽत्र पुंलिङ्ग एव। शङ्ख: पद्म:। भूतशब्द: पिशाचे उभयलिङ्ग:। भूत: भूतम्। अन्यत्र नपुंसकलिङ्ग:। भूतं[26] उपचितम्। भूतानि प्राणिन:[27]। उपमा[28]वचन: क्रियावचनश्च अभिधेयलिङ्ग:[29]। पितृभूतोऽयं, पितृभूतमिदं, मातृभूतोऽयं मातृभूतमिदम्। पितेव मातेव इत्यर्थ:। भूत: भूतं भूता इति अतीतार्थ:। भूत: भूतं भूता इति जातार्थ:। लवणे सैन्धवशब्द:[30] उभयलिङ्ग:। सैन्धव: सैन्धवम्। यौगिकस्तु अभिधेयलिङ्ग:। सैन्धवोऽश्व:, सैन्धवं वस्त्रं, सैन्धवी नारी[31]। उत्कर्षे सारशब्द: पुंलिङ्ग:। न्यायादनपेते नपुंसकलिङ्ग एव॥ ७५॥

धर्मोऽयमित्यपूर्वे भवति च तत्साधनेऽपि धर्ममिदम्।
अर्धमिदं समभागेऽसमभागेऽर्धोऽपि च प्रेम॥ ७६॥

अपूर्वे, अनुमेये पुण्ये, धर्मशब्द: पुंलिङ्ग:। तस्य साधने दानादौ नपुंसकलिङ्ग इत्यर्थ:। समभागे अर्धशब्द: नपुंसकलिङ्ग:। यथा—खार्यर्धम्[32]। असमभागे पुंलिङ्ग एव। यथा—अर्ध:[33] पटी[33], अर्धो[34] नगरं[34], ग्रामार्ध:[35] वस्त्रार्ध:[36]। अन्यत्र अभिधेयलिङ्ग:। अर्ध:[37] पट:[37], अर्धा नगरी, अर्धं[38] कुण्डम्[38]। प्रेमा प्रेम प्रियत्वम्॥ ७६॥

लोहपटहदेहद्वीपिनदृढमातङ्गकण्टकविटङ्कम्।
कान्तारजठरकन्दरशेखर[39] केदारवरपारम्॥ ७७॥

---

20 BG °गरुधूपप्रवहश्च गेह: 21 D °न्तोऽदन्त: 22 B पलमानानि 23 D वारवाण°, G वारण° 24 G भूतं, BD भूत° 25 B अथ. 26 to 29 Missing in D, 27 B adds मर्त्यादि महाभूतानि. 28 GB उपमान° 30 to 31 Missing in D. 31 G सैन्धवा नारी, D सैन्धवी पटी 32 Om D. 33 Om GB, D अर्धंपटी. 34 B अर्धं नगरं, Om D, 35, 36 Om GB, 36 D अर्धं वस्त्रं वस्त्रार्ध: 37, 38 Om D. 39 DD¹ शेषर.

एते पुन्नपुंसकलिङ्गा भवन्ति । लोहः लोहं अयःप्रभृतिद्रव्यविशेषः । पटहः पटहं वाद्यविशेषः[40] । देहः देहं शरीरम् । द्वीपिनः द्वीपिनं[41] व्याघ्रः । दृढः दृढं अविनष्टः[42] । आतङ्कः आतङ्कं इष्टवियोगजस्तापः[43] । कण्टकः कण्टकं बिल्वादीनां अवयवविशेषः[44] । विटङ्कः विटङ्कं कपोतपाल्यादि[45]न्यासविशेषः । कान्तारः कान्तारं वनम् । जठरः जठरं उदरम् । कन्दरः कन्दरं गुहा[46] । शेखरः[39] शेखरं[39] शिरोभूषणम् । केदारः केदारं क्षेत्रविशेषः । वरः वरं श्रेष्ठः[47] । पारः पारं परतीरम् ॥ ७७ ॥

खण्डलमण्डलमुकुलाः कपालखलकुलिशवाल[48]पूलाश्च ।
स्थानफलकोत्पलनिदाघमेचकवितानकुसुमाश्च ॥ ७८ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । खण्डलः खण्डलं खण्डवत्[49] । मण्डलः मण्डलं भूभागविशेषः[50] । मुकुलः मुकुलं कुड्मलः[51] । कपालः कपालं घटादीनां[52] अवयवविशेषः । खलः खलं दुर्जनः[53] । कुलिशः कुलिशं शम्बः[54] । व्याडिस्तु नपुंसकलिङ्गमाचष्टे । भट्टिकाव्ये पुंस्त्वमपि दृश्यते—

" निरस्तोदग्र[55] धाराग्रः कुलिशो मम वक्षसि ।
अभिन्नं शतधात्मानं[56] मन्यते बलिनं बली[57] ॥ " इति ।

बालः बालं शिशुः केशश्च[58] । पूलः पूलं बद्धतृणसञ्चयविशेषः[59] । स्थानः स्थानं आश्रयः[60] । फलकः फलकं चर्मावरणम्[61] । उत्पलः उत्पलं जलसम्भवविशेषः । निदाघः निदाघं ग्रीष्मः[62] । मेचकः मेचकं श्यामः[63] । वितानः वितानं विस्तारः उल्लोचः[64] शून्यं यज्ञश्च । कुसुमः कुसुमं पुष्पम् ॥ ७८ ॥

स्नेहमुखमूलकपटलवर्चस्ककुणपविडङ्गनीडा[65]श्च ।
पिष्टपलितकुक्कटमरकमुभयलिङ्गा इति समाम्नाः ॥ ७९ ॥

एते पुन्नपुंसकलिङ्गा भवन्ति । स्नेहः स्नेहं सौहृदम्[66] । मुखः मुखं वदनम् । मूलकः मूलकं भूमिजो द्रव्यविशेषः । पटलः पटलं गृहोपरिभागः नेत्ररोगविशेषश्च ।

---

40 B वादित्रविशेषः 41 G द्वीपी द्वीपि. 42 G अविश्लिष्टं, D अविनष्टं कम्पः 43 G इष्टविप्रयोग,° B इष्टवियोगभावः 44 BD विकारविशेषः 45 B °पार्श्वादि° 46 D गह्वरं, 47 G श्रेष्ठम् । 48 GB वाल. 49 Vide Addi. Notes. 50 B भागवि°. 51 D कुड्मलं. 52 D घटीनां. 53 G दुर्जनविशेषः 54 D सम्बः 55 G निशतोदग्र° 56 G °धा ध्यानं. 56 G वशी. 58 Om G. 59 D °सञ्चयः । 60 B आश्रमः 61 B चर्मा. 62 BD ग्रीष्मं. 63 GD श्यामं 64 Om BD. 65 B नीला°

वर्चस्कः वर्चस्कं शकृत् । कुणपः कुणपं शवम्[67] । विडङ्गः विडङ्गं कृमिहा[68] | नाडः[65] नीडं[65] पक्षिवासविशेषः[69] । पिष्टः पिष्टं अपूपः[70] । पलितः पलितं पक्व-केशः[71] । कुक्कुटः कुक्कुटं ताम्रचूडः । मरकः मरकं बनप्राणिमरणम्[72] ॥ ७९ ॥

इति[73] लिङ्गवृत्तौ[73] उभयलिङ्गव्याख्यानं[74] समाप्तम् ॥

[अथ स्त्रीनरलिङ्गवाचकाः शब्दा व्याख्यायन्ते ।]

[५. स्त्रीनरलिङ्गप्रकरणम् ।]

सल्लक[75] वृश्चिकपिटककुटिवराटकमल्लक[76] कटयष्टिघटाः ।
शाट[77] किटसृपाटमरीचिमुष्टिकिष्कुमणितरणितिथि ॥ ८० ॥

एते स्त्रीनरलिङ्गा भवन्ति । वक्ष्यति[78] "स्त्रीनरलिङ्गा इति समाप्ताः ।" इति, तेनायं सम्बन्धः सिद्धो भवति । सल्लकी[75] सल्लकः[75] सुरभिवृक्षविशेषः[79] । वृश्चिकी वृश्चिकः[80] क्षुद्रजन्तुविशेषः[81] । पिटका[82] पिटकः कण्डोलम्[83] । कश्चित्पुन्नपुंसकलिङ्गमाह । इयं कुटिः अयं कुटिः स्वल्पावासः[84] । वराटिका वराटकः कपर्दकः[85] । मल्लिका मल्लकः[76] तैलाद्याधारविशेषः[86] । कटी कटः ओषधिविशेषः[87] । इयं यष्टिः अयं यष्टिः दण्डः । घटी घटः कुम्भः । शाटी[77] शाटः[77] वस्त्रविशेषः । किटी किटः वंशादिपुत्तलिका[88] । सृपाटी सृपाटः परिमाणविशेषः[89] । इयं मरीचिः अयं मरीचिः किरणः । इयं मुष्टिः अयं मुष्टिः अङ्गुलीनां सङ्कोचः[90] । इयं किष्कुः अयं किष्कुः वितस्तिः हस्तश्च । इयं मणिः अयं मणिः रत्नम् । इयं तरणिः अयं तरणिः आदित्यः समुद्रश्च[91] । इयं तिथिः अयं तिथिः दिनम् ॥ ८० ॥

---

66 B सौहृद्यं. 67 G शवः 68 B विडिंगः विडिंगं. 69 G पक्षिस्थानं. 70 D अपूपं. 71, 72 Vide Addi. Notes. 73 Om BD. 74 G °लिंगशब्दव्या° 75 G शल्लक° 76 G मल्लिक° 77 BDD_1 साट° 78 Vide verse 82. 79 B सुरभिवृक्षः D सुरभिः 80 GBD वृश्चिका. 81 G अलिः 82 D पिटिका. 83 G गण्डोलं, D गंड. 84 G शिल्पावासः 85 D adds कपर्दः कपर्दिका. 86 B तैलाद्याधारः 87 D औषधवि° 88 B° दिपिपीलिका, D° दिपल्लविका. 89 G चन्मुपरिमाणवि° 90 D adds परिणाम (माण ?) विशेषः 91 G वेदी आदित्यश्च.

अण्यरणिश्रेणिस्वातिबस्ति[92] रेणुमुनियोनिकर्कन्धु ।
सिन्ध्विषुधिमन्वशनिमृत्युकन्दरकलम्ब[93]शाल्मलयः ॥ ८१ ॥

एते स्त्रीनरलिङ्गा भवन्ति । इयं अणिः अयं अणिः अक्षाग्रकीलिका[94] । इयं अरणिः अयं अरणिः अग्न्युत्पत्तिकारणं काष्ठविशेषः[95] । इयं श्रेणिः अयं श्रेणिः पङ्क्तिः तुल्यशिल्पिसमुदायश्च[96] । इयं स्वातिः अयं स्वातिः नक्षत्रविशेषः[97] । इयं बस्तिः[92] अयं बस्तिः[92] गुदम् । इयं रेणुः अयं रेणुः धूलिः । इयं मुनिः तपस्विनी, अयं मुनिः तपस्वी[98] । इयं योनिः अयं योनिः उत्पत्तिस्थानम्[99] । इयं कर्कन्धुः अयं कर्कन्धुः बदरी । इयं सिन्धुः अयं सिन्धुः सरित् । इयमिषुधिः अयमिषुधिः शराणां स्थानम् । इयं मनुः अयं मनुः प्रजापतिः[1100] । इयमशनिः अयमशनिः वज्रम् । इयं मृत्युः अयं मृत्युः प्राणवियोगः[1] । कन्दरा कन्दरः[2] पर्वतैकदेशः । कन्दरी[3] दरी[4] इति नित्यं स्त्रियाम् । कलम्बा[93] कलम्बः[93] शालिविशेषः[5] । इयं शाल्मलिः अयं शाल्मलिः वृक्षविशेषः ॥ ८१ ॥

द्विचतुष्पदभ्रमरवरट[6]नाम मूषेषुबाह्वहि सदंशम् ।
पाटलिजाटल्यूर्मि स्त्रीनरलिङ्ग इति समाप्ताः ॥ ८२ ॥

द्वे चत्वारि च पदानि येषां ते द्विचतुष्पदाः । द्विचतुष्पदाश्च भ्रमरश्च वरट[6]श्च तेषां नाम संज्ञा । मूषश्च इषुश्च बाहुश्च अहिश्चेति समाहारो द्वन्द्वः । सह दंशेन वर्तते इति सदंशम् । पाटलिश्च जाटलिश्च ऊर्मिश्चेति समाहारो द्वन्द्वः । एते स्त्रीनरलिङ्गा भवन्ति । द्विपदनाम—ब्राह्मणी ब्राह्मणः क्षत्रिया[7] क्षत्रियः वैश्या वैश्यः शूद्रा शूद्रः[8] मयूरी मयूरः कोकिला कोकिलः । चतुष्पदनाम—हस्तिनी हस्ती कूर्मी कूर्मः । जातिवचनत्वात्[9] नित्यं स्त्रीत्वं प्राप्तम् । भ्रमरनाम—भ्रमरी भ्रमरः मधुकरी मधुकरः । वरट[6]नाम—वरटी[6] वरटः[6] । शिल्पिनी शिल्पी सुवर्णकारी सुवर्णकारः कलादी कलादः नापिती नापितः इति द्विपदजातित्वात्[10] । मूषी मूषः प्राणिविशेषः । इयमिषुः अयमिषुः शरः । इयं बाहुः अयं बाहुः भुजः[11] । इयमहिः अयमहिः सर्पः ।

---

92 BD वस्ति. 93 B कस्वल (कश्मल ?). 94 G adds बद्रद्रल (?) BD °कीलकः 95 BD add च. 96 Vide Addi. Notes. 97 G नक्षत्रं. 98 G om तपस्विनी. 99 D भगः 1100 Vide Addi. Notes. 1 D प्राणविशेषः 2 B adds कन्दरा. 3 Om G. 4 Om D. 5 Om D, B गोकर्णविशेषः 6 GD वरठ° 7 to 8 Om G. 9 D जातिवचनात् । 10 G द्विपदादित्वात् D द्विपदत्वात् 11 DG भुजा.

दंशी दंशः क्षुद्रजन्तुविशेषः । इयं पाटलिः अयं पाटलिः वृक्षविशेषः[12] । इयं[13] जाटलिः अयं जाटलिः वृक्षविशेषः[14] । इयमूर्मिः अयमूर्मिः तरङ्गः[15] ॥ ८२ ॥

इति[16] लिङ्गवृत्तौ[16] स्त्रीनरलिङ्गव्याख्यानं[17] समाप्तम्[18] ॥

[अथ स्त्रीनपुंसकलिङ्गवाचकाः शब्दा व्याख्यायन्ते ।]

[६. स्त्रीनपुंसकलिङ्गप्रकरणम् ।]

अर्चिर्नगरं वृत्ताख्या बहुलं भावकर्मणोरकणा ।
यण् स्त्रीनपुंसकाख्याः हरीतकबिभीतकतटपुटम् ॥ ८३ ॥

वृत्तानामक्षरविन्यासानां आख्या नाम । अर्चिः नगरं वृत्ताख्या पुनर्बहुलमेते स्त्रीलिङ्गाख्या नपुंसकलिङ्गाख्या भवन्ति । यणन्तं च भावकर्मणोर्विहितेन अकणा अकणन्तेन सह बहुलं[19] स्त्रीनपुंसकलिङ्गं[20] भवति । हरीतकादि तु सर्वलिङ्गं भवति । वक्ष्यति[21] "एते च सर्वलिङ्गा" इति, तेन सहास्य सम्बन्ध इष्यते[22] । इयमर्चिः इदमर्चिः ज्वाला । इयं नगरी इदं नगरं पत्तनम्[23] । वृत्ताख्या यणन्तं च द्विलिङ्गमुक्तम् । तथापि केचित् स्त्रियां केचिन्नपुंसके केचित् पुंसि केचित् स्त्रीनपुंसकयोः बहुलग्रहणात्प्रयोगतः[24] इति । वृत्तनाम यथा—समानी प्रमाणी[25] कलिका इत्येवमादि स्त्रियां, वक्त्रं पथ्यावक्त्रं इत्यादि नपुंसके, पुटः पणवः आपीडः[26] इत्यादि पुंसि । "यण् च प्रकीर्तितः ।" [कातन्त्रसूत्र] उचितस्य भावः औचिती[27] औचित्यम् । सामग्री[28] सामग्र्यम्[28] । एवं यथाकामी यथाकाम्यं,[29] मैत्री मैत्र्यं इत्यादयः स्त्रीनपुंसकाः । "यस्याऽऽपत्यस्य" [?] इत्यादिसूत्रे "यस्य" इति योगविभागात् यस्य[29a] स्त्रियां लोपः । शौक्ल्यं, दैर्घ्यं[30] दार्ढ्यं,[31] जडस्य भावः कर्म वा[32] जाड्यम् । एवं ब्राह्मण्यं माणव्यं[33] वाडव्यं इत्यादयो नपुंसके । अणन्तं यथा । "योपधाद्गुरूपोत्त-

---

12 D पुष्पवि° 13 to 14 Om G. 15 B कल्लोलः 16 Om BD 17 G °लिङ्गशब्दव्या° 18 Om G. 19 Om B. 20 Om GD. 21 Vide verse 85. 21 to 22 Missing in G. 23 B adds अयं नगरः पत्तनाख्यं. 24 D प्रयोग इति. 25 B adds पथ्या. 26 Vide Addi. Notes. 27 Om D. 28 Om B. 29 Vide Addi. Notes. 29a B यकारस्य. 30 G दैर्व्यं, D दीर्घं, B om. 31 Om D. 32 Vide Addi. Notes 33 B माण्डव्यं.

माद् [वुञ् " पा. ५. १. १३२] [इत्या-] देस्तु [34] प्रख्यादकण् [35] दृश्यते । शिष्यश्चोपाध्यायश्च शिष्योपाध्यायौ, तयोर्भावः कम वा शैष्योपाध्यायिका [36]। एवं कुत्सकुशिकिका [37] । गार्ग्यस्य भावः कर्म वा गार्गिका [38] । एवं काठिका इत्येवमादयः स्त्रियाम् । रमणीयस्य भावः कर्म वा रामणीयकम् [39]। एवं साहाय्यकं [40] मानोज्ञकं इत्यादयो नपुंसके ॥

इति स्त्रीनपुंसकलिङ्गव्याख्यानं समाप्तम् ॥

[७. सर्वलिङ्गप्रकरणम् ।]

सर्वलिङ्गं यथा— हरीतकी हरीतकः हरीतकं, बिभीतकी [41] बिभीतकः [41] बिभीतकं, [41] तटी तटः तटं, [42] पुटी पुटः पुटम् ॥ ८३ ॥

पेटकवाट [43] वटमठं दरभल्लातक [44] विषाणवल्लूरम् [48] ।
शृङ्खलपुरामलकवाटमण्डलकलशकुवल [46] पात्रम् ॥ ८४ ॥

एते सर्वलिङ्गा भवन्ति । पेटी पेटः पेटं सङ्घातः । कवाटी [43] कवाटः [43] कवाटं [43] द्वारपिधानम् । वटी वटः वटं वृक्षविशेषः [47] । तस्य फलं वटम् । मठी मठः मठं आश्रमविशेषः । दरी दरः दरं रन्ध्रविशेषः । भल्लातकी भल्लातकः भल्लातकं वृक्षविशेषः । विषाणी विषाणः विषाणं शृङ्गं करिदन्तश्च । वल्लूरा [48] वल्लूरः [45] वल्लूरं [45] शुष्कमांसम् । शृङ्खला शृङ्खलः शृङ्खलं बन्धनम् । पुरी पुरः पुरं नगरम् । आमलकी आमलकः आमलकं वृक्षविशेषः । तस्य फलं आमलकमित्येके । वाटी वाटः वाटं आवरणम् । मण्डली मण्डलः मण्डलं देशः चतुरस्रता च । कलशी [49] कलशः [49] कलशं [49] जलाधारविशेषः । कुवली [46] कुवलः [46] कुवलं [46] वृक्षविशेषः । तस्य फलं कुवलं [46] इदम् । पात्री पात्रः पात्रं भाजनम् ॥ ८४ ॥

---

34 G योपधगुरुपोत्तमादयेस्तु (B °त्तमपदेषु) D योपधात् गुरुषोत्तमादि 35 B संख्याचकण्- D प्रष्णादकण् । 36 B शिष्यो°, G °ध्यायकं, D शिष्योपाध्यायकौ. 37 Om B, G कौत्सकुत्सिका, D कौत्सकुशिका. 38 to 40 Vide Addi. Notes. 41 B बिभी° 42 G नटः नटी नटं 43 G कपाट° 44 BD भल्लात. 45 B वल्लर° 46 G कुवलय° 47 G वृक्षः 48 G वल्लरी B वल्लरी 49 D कलस°

एते च सर्वलिङ्गा गुणादयो वाच्यलिङ्गकाः शेषाः।
ष्णान्ता सङ्ख्याऽलिङ्गा कत्यव्ययुष्मदस्मच्च ॥ ८५ ॥

एते पूर्वोक्ताः स्त्रीपुंनपुंसकलिङ्गा भवन्ति । गुणादयो गुणवचनादयो । वाच्यमभिधेयं तस्यैव लिङ्गं येषामिति । "शेषाद् वा[50] बहुव्रीहौ[51] कः" [?] इति कप्रत्ययः । शेषाः परिशिष्टा गुणादयो वाच्यलिङ्गका भवन्ति । आदिग्रहणात्[52] सङ्ख्या सर्वनामसंज्ञाकृताश्चेत्यर्थः । षकारनकारान्ता संख्या पुनरलिङ्गा । कतिश्च अव्ययश्च युष्मच्च अस्मच्चेति समाहारो द्वन्द्वः । एतदपि अलिङ्गं[53] इत्यर्थः । गुणवचनं यथा—शुक्ला शाटी,[54] शुक्लः पटः, शुक्लं वस्त्रम्[55] । तिस्रः स्त्रियः, त्रयः पुरुषाः, त्रीणि कुलानि; एवं चतस्रः स्त्रियः, चत्वारो नराः, चत्वारि मित्राणि । एकद्विशब्दयोः सर्वनामत्वात् च तथा सिद्धिः । सर्वाः स्त्रियः, सर्वे पुरुषाः[56], सर्वाणि कुलानि; देवदत्ता नाम काचित्, देवदत्तो नाम कश्चित्, देवदत्तं नाम किञ्चित् । एवं अन्येऽपि ये यस्मिन्नभिधेये अभिधीयन्ते[57] ते तद्वाच्यलिङ्गा एव सिद्धाः । ष्णान्ता संख्या सर्वेषु लिङ्गेषु तुल्यरूपा । यथा षट् स्त्रियः, षट् पुरुषाः, षट् कुलानि, पञ्च स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि । एवं कति स्त्रियः, कति पुरुषाः[58], कति कुलानि । कतिशब्दः स्वभावात् बहुवचनवाची । एवं उच्चैः स्त्री, उच्चैः तरुः[59], उच्चैः कुलं; तत्र शालायां, तत्र ग्रामे, तत्र नगरे । एवं त्वं स्त्री, त्वं नरः[60] त्वं कुलं; अहं स्त्री, अहं नरः अहं कुलम् । तथाऽत्याद्यन्तस्यापि[61] गुणभूतसाधनवाक्यापेक्षया[62] वाच्यलिङ्गेन योगो नाभिधीयते ॥ ८५ ॥

इति सर्वलिङ्गव्याख्यानं[63] समाप्तम्[64] ॥

आनन्त्यादिह शब्दानां लिङ्गनामप्यनन्तता ।
सुवर्णैर्घटितं किञ्चिद्बालानां मुखमण्डनम् ॥ ८६ ॥

---

50 GB च. 51 Om GB. 52 B आदिशब्दात. 53 GB अव्ययलिङ्गं. 54 GD साटी. 55 D पटं. 56 B नराः 57 B वर्तन्ते. 58 G नरा 59 D नरः, B वृक्षः 60 G पुमान् । 61 D om अपि. 62 D अगुणवचनसाधनवाच्यपेक्षया. 63 D सर्ववाच्यालि° 64 O G, D इदं.

इह शब्दानामानन्त्यादनन्तत्वात् लिङ्गानामप्यनन्तता सिद्धा । यथा सुवर्णैः अक्षरैः वा सुवर्णेन धातुना [वा] घटितं किञ्चिद् बालानां छात्राणां वा स्त्रीणां [वा] मुखमण्डनं भवति । एतावता अनन्तत्वमुक्तम् ॥ ८६ ॥ एवमार्याः ८६ ॥[65]

दुर्गसिंहोऽथ दुर्गात्मा दुर्गो दुर्गप इत्यपि ।
यस्य नामानि तेनैव लिङ्गवृत्तिरियं कृता ॥ ८७ ॥

इति श्रीदुर्गसिंहविरचिता लिङ्गकारिकावृत्तिः समाप्ता ॥[67]

इति दुर्गात्मकृतं लिङ्गानुशासनं समाप्तम् ॥[68]

शुभं[69] भवतु ॥ श्रीरस्तु ॥

---

65 Verse 86 with its comm. is available only in G. 66 B °होऽपि 67 This line only in B. 68 D समाप्तेदं लिङ्गानुशासनं, Om B. 69 D श्रुतं. G om this line. *End* : G ग्रन्थसंख्या ६०० षट्शतानि सन्ति । संवत् १५२४ वर्षे फाल्गुन शुदि १० गुरौ मोढज्ञातीयश्रीमुकुन्देन लिखितम् । अङ्क ४८ ॥ B श्रीसंवत् १४७९ मार्गशीर्ष वदि १४ गुरु ॥ D (in a different hand) ग्रन्थश्लो ६०५ माजनु ॥ लिङ्गवृत्तिः दुर्गसिंहकृता ॥ D^1 om verses 86, 87 and ends : भट्टारकश्रीलक्ष्मीचन्द्रपठनार्थम् (written and obliterated) । ॐ श्री जयनन्दी ॥

ADDITIONAL NOTES

Verse 1. —2. G breaks the symmetry : अयमियं...... स्त्री च पुमांश्च.

—7. Nityam has a pun on it : (1) liṅga esp. Śivaliṅga keeps up the continuity of the world by the power of creation, (2) it is the constant cause of the world.

—8. The reference is to Vr's Liṅg. which is the oldest.

Verse 2. —10. अवशिष्टानि suits well with तानि त्यक्त्वा. In विशिष्टानि the initial अवग्रह is read wrongly by the scribe : ऽ व >वि.

Verse 3. —13. गवेधुका तृणधान्याविशेषः । ...गवीधुकेत्यपि । Hc 2 11. गवेधुर्गवेधुका । अमरः । गवेधुर्नाम मुन्यन्नम् . क्षीरस्वामी ।

—15. शेफालिका निर्गुण्डीभेदः । वल्लभवाचकः ।

—16. अमर has हसन्ती and हसनी. Hc has हसनी, हसन्ती, हसन्तिका.

Verse 4. —17. Hc 2·10 has झिरुका मृद्विकारविशेषः । वल्लभवाचक explains it by झारी.

—18. Hc has इष्टका मृद्विकारविशेषः ।

—22. Hc has both इषीका, इषिका, वीरणशलाका । वल्लभ explains, उशीरनाम्नः तृणस्य शलाका ।

—25. D explains पताका वैजयन्ती खट्वाङ्गं च । This is wrong. The verse quoted does not support this latter meaning.

—28. Hr. 7 comm : नाडिः कंदली च प्रणमाविशेषश्च (V. L. प्राणिवि°), सिरा वायकभाण्डं च। MW supports व्रणविशेषश्च as नाडी according to him is a fistuous sore (Suśr.), any hole, crevice (Kathās.).

Verse 5. —31. Hc quotes "चूडायां च शिफायां च ज्वालायां चाग्रमात्रके ।
शाखायां केकिचूडायां लाङ्गलिक्यां घृणौ शिखा ॥ प्रधानेऽपि"

—33, 34, 35. Hc has the same explanations as accepted in the text.

—37. Hc has प्रियङ्गु *m* in धान्यनाम. Elsewhere he explains, अयं लताविशेषे शिंशपादित्वात्स्त्री ।

—39. परपरिभाषया is a reference to verse 82.

Verse 6. —45. Hc quotes : "पिच्छा तु शाल्मलीवेष्टे मण्डे चाश्वपदाऽऽमये ।
पङ्क्तौ पूगच्छटाकोशमोचाविजिविलेषु च ॥"

whereof मण्डे is explained by वल्लभ thus : मण्डशब्देन दध्यादेरितरः, लोकोक्त्या राद्धधान्यस्योपरि या भवति सा खेपरी इत्युच्यते । अवस्रावणं च लोके ओसावण तत्र। Compare with this the reading of G.

—46. Hc mentions the two as synonyms of कृष्णला. वल्लभ explains the latter word by चिरमी. Compare it with चिणोठी of D.

Verse 7.—59, 60. Hc gives मदिरा हाला शुण्डा as synonyms, but does not support the sense, पानागारम्। Durga gives it on the authority of अमर whom he misunderstands : शुण्डापानं मदस्थानम् ।

—61. Hc gives, क्रोडा क्रोडं अङ्कः। Vardhamāna in his Gaṇaratna. (p. 73) says, क्रोडशब्दः स्त्रीलिङ्गः। 'विष्ठा मञ्जिष्ठा काष्ठा' इत्यादि लिङ्गकारिकासामर्थ्यात्। Elsewhere (Prin. Karmarkar Comm. Vol. p. 88) I identified this kārikā with Hc Liṅg. 2.15, but that was an error. For, in that verse of Hc the word kroḍa is not mentioned at all. With Durga's text now available to us we can easily see that Vardhamāna by the term Liṅga-kārikā is referring to verse 7 of Durga's Liṅg. and the verse does include the word kroḍā f.

—62. Hc gives, माढिः पत्रसिरा। Elsewhere Hc gives it as the name of some region. So does क्षीरस्वामी--माढिर्नाम देशः। Has this lattar meaning anything to do with the reading of B ?

—63. Cf: वितण्डा स्वपक्षस्थापनाहीनो जल्पः। न्यायसू. 1.2.3.

Verse 8. —67. Decidedly a later reading.

—69. In Hc तूण is *mfn* and means इषुधिः। The latter is explained by वल्लभ—लोके भाथओ. Compare with this the reading of D.

—75. क्षीरस्वामी explains पण्यवीथिका by हट्टवर्त्न्याम् and वल्लभ by हट्टमार्गे. Compare the reading of D हट्टेसिरिः।

Verse 9. —80. Hc says, वर्तिः दीपः तद्दशा च। Hr comm. has वर्तिः दीपाङ्गम्।

—81. Hr comm; अयं कुथः इयं कुथा वर्णास्तरणं, गजाश्वपृष्ठाच्छादनम्। Hc says: कुथः कुथा कुथं वर्णकम्बलम्। यन्माला 'कुथं त्रिषु'।

—82. The addition in G is wrong because the citation is from Māgha, Śiśu. 1.8.

Verse 10. —85. Hc : अजमोदा ब्रह्मकुशः। पुंसि वाग्भटः, स्त्रियाममरः। Amara : अजमोदा ब्रह्मदर्भा। क्षीरस्वामी asserts that खराश्वा, अजमोदा, and ब्रह्मकुशा are names of the same medicinal herb.

—87. Hc : पोटा शण्ढः। ... नटीवेश्ययोस्तु योनिमन्नामत्वादेव स्त्रीत्वम्।

—88. Hc : गोधा दोस्त्राणं प्राणिविशेषश्च। Amara : गोधा ज्याघातवारणे।

—90. Hc : पेयूषं लेपनं सुधा। Amara : सुधा लेपोऽमृतम्।

Verse 11. —95. Hc : सास्ना गोगलचर्म निद्रा च। Amara : सास्ना गोगलकम्बलः।

—96. Hc : वपा विवरं मेदश्च।

Verse 12. —98. Hc : भम्भा भेरी।

—100. Hc : कम्बिः वेण्वादिदलविशेषः दर्विश्च।

—4. पाशकषडङ्किता is suggested as an emendation in the light of the variants and Hc's explanation : इयं दुन्दुभिः अक्षबिन्दुलिकद्वयम्।

—5. The same quotation is given by क्षीरस्वामिन्, Hc and Ś.

—7. Amara : अतसी स्यादुमा क्षुमा।

—9. दुर्गसिंह on Kātantra 2.4.50 says : स्त्रियां वर्तमानाल्लिङ्गादकारान्ताद् आप्रत्ययो भवति। स्त्रीपुन्नपुंसकानि लोकलिङ्गानुशासनगम्यानि। अजा... ...

—10. श्रद्धासंज्ञा stands for the type of f stems in —ā.

—11. Cf. Kātantra 2.1.48—ईकारान्तात्सिः। नदीसंज्ञकेकारान्तात्परः सिः लोपमापद्यते। For नदीसंज्ञा, read Kātantra 2.1.9—ईदूत् स्त्र्याख्यौ नदी।

Verse 13.—13, 18. Hc. reads, कृसरा कृसर: तिलौदन इति हर्षारुणौ । but Hr. comm. has. अयं कृसरः इयं कृसरा तिलतण्डुलमिश्रं भोजनम् ।

—15. If we accept the reading of B, we can say that तारा भगवती, the favourite deity among the theistic school of Buddhism as the mother-goddess and saviour, is referred to twice, here and in 12·7. This small detail must be taken into account in settling the date of Durga.

—17. Amara: प्रतिसीरा जवनिका ।

Verse 14. —19. Hc has: मात्रा परिच्छदः मानं अल्पं ... ।

—23. Hc : वागुरा मृगबन्धनी ।

Verse 15. —27. Hc : दोला प्रेङ्खा ।

—29. Hc quotes : वेला काले च जलधेस्तीरनीरविकारयोः । क्षीरस्वामिन् says जलधिजलविकारे वेला, तटेऽप्युपचारात् ।

Verse 16. —31. Hc : भोजनोज्झितम् । Amara : भुक्तसमुज्झितम् ।

—32. Hc : सुवर्चला शाकविशेषः । Hr Comm. सौवर्चलं कृष्णलवणम् ।

—33. Hr Comm. : शष्कुली कर्णदेशः अपूपविशेषश्च ।

—34 वल्लभ says : पालिरिति कर्णलतिका ।

—36. Hc : प्रवेणिः गीतप्रस्तारः आस्तरणं वेणिश्च ।

Verse 17. —41, 48. Hc : मुषुण्ढिः दण्डविशेषः आयुधविशेषश्च ।

—42, 55, 56. Hc has exactly the accepted readings.

—44. Hc : छविस्त्वक् । Amara : शोभाकान्तिर्द्युतिश्छविः ।

—47, 51. Also Hc.

—49, 50. Hc : शम्या तालविशेषः युगकीलश्च ।

—54. Hc: कशा अश्वादिताडनचर्मदण्डः ।

Verse 18. —66, Hc admits वृसी, वृषी, वृशी ।

—70. On नदादित्व vide note 11 to verse 12.

—74. Hc ; अयमूरुः इयमूरुः । 'सक्थि पुमानूरुः' इत्यमरः । स्त्रियां दुर्गः ।

Verse 19. —80, 81. Hc says, कक्षा प्रकोष्ठः गजरज्जुश्च । and कक्ष्या in the following senses : स्त्रियां प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।

—84. Hc : सूचिः सेवनी । क्षीरस्वामी—सूचिः सीवनी ।

—85. Hc : मरिर्मोरिश्च मरकम् ।

—87. Hc : आरा चर्मप्रभेदिन्याम् ।

Verse 20. —88. Hc : इयं किखि. कालगोत्रविशेषः (whereon वल्लभ explains काल by यम !) । सृगास्यां तु योनिमन्त्रामत्वादेव सिद्धम् ।

—93. MW : a small house-lizard L.

—95. Hc : लिपिः लिविः अक्षरविन्यासः ।

—96. Hc : कृषिः (पिः?) छेदोपकरणम् ।

—97. MW : a small kind of jackal or fox.

—3 to 7. Hc lists only हलि and सृणि; MW records विटि; Others in text and notes are not found in Amara, Hc or MW.

—12. Not known to Amara, Hc, and MW.

—15. कम् :—Not known to the above three.

Verse 21. —17. Hc : शाटिः प्रावरणविशेषः ।

—32. Hc : स्फिक् क्षुतं पुतः etc. । of which पुतः is explained by वल्लभ—लोके पूंइ.

—45. G मौलि f cannot be the original reading as मौलि m is taught in verse 33.

Verse 22. —46. Hc ; अयं रत्निः इयं रत्निः बद्धमुष्टिः करः । अयमरत्निः इयमरत्नि सकनिष्ठः करः । रत्न्यरत्नी साहचर्यात्पुंसीत्यमरटीका । Amara: अरत्निस्तु निष्कानिष्ठेन मुष्टिना (करः) ।

—48, 49. पाणि is *m* because of the exception rule to follow (परा) in verse 36.

—65. अम्भस् though meaning 'river' is *n* because of the general rule to follow (परत्वेन) in verse 52.

—70. कु and उषस्, being भूनाम and अङ्गनानाम respectively are *f*. They are not *m* or *n* in spite of the rules about words ending in -u and -as that are to follow in verses 35 and 53 respectively. Thus, here the earlier (पूर्व) rule is followed and the later (पर) is rejected in spite of the dictum पूर्वपरयोः etc., because पूर्व = पर = इष्ट.

Verse 23.—77. Hc quotes "वृन्दे सामाजिके गोष्ठ्यां द्यूतमन्दिरयोः सभा । The comm. whereto explains सामाजिके इति सभायोग्ये ।

—84. G's longer list exactly agrees with Hc's.

—85. Cf. P. 3.4.70—तयोरेव कृत्यक्तखलर्थाः ।

—86. Cf. P. 3.1.106 - वदः सुपि क्यप् च ।

—88. Cf. P. 3.1.107—भुवः भावे ।

—90. Cf. P. 3.3.99— संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः । with Kātantra 4.5.76— समजासनिषदानिपातिशीङ्सुविद्याटिचारिमानिभृञिणां संज्ञायाम् ।

Verse 24. —3. दशा is taught twice : here and in verse 17, though the senses differ.

—7. क्षीरस्वामिन्—समां समां विजायते (पा. ५.२.१२) इत्येकत्वेपि दृश्यते । Hc : एकत्वे लक्ष्यम्— "तृतीयस्याः समायास्तु समां समां विजायते । Ś 41 comm. gives the same citation : 'तृतीयस्याः समायास्तु' इति । Pp. 1.29 comm. : बहुत्वं प्रायिकम् । ... समां समां विजायते इत्यत्र 'समायां समायां' इति भाष्याच्च ।

—8. The quotation निर्गतत्वं etc. is not to be found in the महाभाष्य of पतञ्जलि.

Verse 25. —13. Hc quotes : शुक्तिः कपालशकले नख्यश्चावर्तयोरपि ।
मुक्तास्फोटे च दुर्नाम्नि शंखशंखनकेषु च ॥

वल्लभ explains ; दुर्नामेति जलौकाकृतिः दीर्घकोशाख्यः जलस्थजीवविशेषः ।

—14. Hc : पामा कण्डूः । पामा कच्छूः ।

—14a. सीमा is taught twice : here and in verse 12.

—15. Hc : जिह्वा रसज्ञा रसना ।

—16. Hc : कारा । बन्धने बन्धशालायां दूतिकायां प्रसेवके । Is गोति-गृह of G a corruption for दूती गृहम् ?

—18. Hc : ईषा लाङ्गलाद्यवयवविशेषः । ईशा लाङ्गलदण्डके ।

—20. Hc : खारिः खारी मानविशेषः ।

—24. "पाशादिभ्यो यः" (पा० ४. २. ४९)।

—27. "इनि त्रकठ्यचश्च" (पा ४. २. ५१)।

—28. उतूलिनी would mean "a group of servants," as MW mentions उतूल, a servant उलूकिनी = herd of owls. Both these formations are possible as खलादि is an आकृतिगण. Cf. Hc. Gr. 6.2.27–खलादिभ्यो लिन् ।

—30, 35. "द्वन्द्वाद्वुन्वैरमैथुनिकयोः" (पा० ४. ३. १२५)। and the vārttika to it : वैरे देवासुरादिभ्यः प्रतिषेधः ।

—34, 36. क्षीरस्वामी appears to support the sense of the reading of B विवादे—'अत्रिभरद्वाजयोर्मैथुनप्रयोजने विवाहे वैरमत्रिभरद्वाजिका, वशिष्ठकुशिका ।' Is शकुशकिका a corruption for वशिष्ठकुशिका?

—36, 38. The तत्त्वबोधिनी does not support the sense of विवाद—'कुत्सकुशिकयोर्मैथुनिका विवाहरूपः सम्बन्ध इत्यर्थः ।' So also Hc: गर्गाणां भृगूणां च विवाहः गर्गभार्गविका । and the काशिका (4.3.125).

—39, 41. "पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च" (पा० ५. ४. १) "दण्डव्यवसर्गयोश्च" (पा० ५. ४. २)।

Verse 26,—58. Hc: युग *n* means युग्मं । कृतादि च । चत्वारि पुरुषयुगाणि । and युग *mn* means—यूपः । वल्लभ explains the last term: इह युगानि कालमानविशेषाः । तानि च क्रमवर्तीनि । तत्साधर्म्यात् ये क्रमवर्तिनः पितृपुत्रप्रपुत्रप्रतिपुत्रादिरूपाः पुरुषास्तेपि युगानि । पुरुषा एव युगानि पुरुषयुगानि । चत्वारः क्रमागताः पुरुषा इत्यर्थः ।

—59. The source of the quotation in B is not traceable. Neither is it correctly preserved in the mss. For, वल्लभवाचक in his comm. to Hc. Ling. (p. 27) cites exactly these lines but differently: "अन्यस्तु युगं युगलं । कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगं चत्वारि नपुंसके ।" इति दुर्गलिङ्गानुशासनवृत्तौ ॥

—61. Hc quotes : "कटाहो घृततैलादिपाकपात्रेऽपि कर्परे ।
कटाहः कूर्मपृष्ठे स्यात्स्तूपे च महिषीशिशौ ॥"

Verse 28.–80. Hc quotes: "कुसूलात्मीययोः कोष्ठः कुक्षेरन्तर्गृहस्य च । etc." This does not support the readings of G.

—88. Hc: पिण्ड *mf* (1) वृन्दे (2) सक्त्वादीनां गोले । and quotes in support, यदरुणः अशरीरे पिण्डः संघातग्रासयोः । On the basis of this I have rejected the readings of DG. The reading of B finds its counterpart in Hr comm. पिण्डः देहः मृदादिवर्तितः [अद्यादिः] देशश्च । but in Hr it is only *m*, not *mf*.

—89. Vide verse 12 note 11, for नदादिगण.

—91, 92. Hc : वण्डः दुश्चर्मे ।

—93. Hc quotes : वरण्डः नाऽन्तरावेदौ समूहमुखरोगयोः । वल्लभ explains : वरण्डः कुड्यं, तृणकाष्ठादिभारश्चेत्युणादिः । यथा– 'वरण्डक्रमदण्डाभ्यां आरुरोह द्विपः क्रुधा ।'

Verse 29. —95. Hc : षण्ड: षण्डं वृक्षादिसमूह: ।
—6. Hc : अयं गरुत्, इदं गरुत्, सुवर्णं पिच्छं च ।
—8. Hc : दृतिः चर्म चर्मप्रसेवकश्च । औणादिकतिगन्तोऽयम् । क्त्यन्तस्य तु स्त्र्युक्ता इति स्त्रीत्वमेव । To this वल्लभ adds, चर्मप्रसेवक इति लोके दीबडो (elsewhere, दोबडो), compare with this, the reading of G दइडु.
—9. MW explains गुञ्ज by humming, bunch, bundle, cluster of blossoms, nosegay. Amara, Hc, and Hr do not record the present sense भाण्डागार of the word. Hc Ling. however has गंज *mn* = भाण्डागार on the authority of गौड:— " भाण्डागारेऽस्त्रियां गञ्ज:" MW. records गंज *mn*, a treasury, etc. Hence we emend the text, against the authority of the mss. In Persian the word means, treasure, collection, bazaar.'

Verse 30.— 15. Cf with B, अमर:—तत्रागाधजलो ह्रद: ।

Verse 31.—33a. Vide verse 82.
—34. The sense शेष: or नागराज: is unknown to Amara, Hc, Hr, and MW.

Verse 32. —40. Hc : अम्ब: सरकादीनाम् । वल्लभ explains : " सरको मदिरापात्रे मदिरापानमद्ययो:" अम्ब is not recorded in MW.
—41. For नदादित्वम् vide note 11 to verse 12.
—49. Hc : पिप्पल: पिप्पली अश्वत्थ: । यद्दुर्ग:— " वृक्षवाचिनस्तु स्त्रीत्वमपि " This quotation exactly agrees with GD.
—51. As गुग्गुलु and हिंगुलु are taught in 35 comm., therefore, we expect here also गुग्गुलु and हिंगुलु.
—52. MW does not note the additional sense तद्भाण्डं च ।

Verse 33. —57. Hc : " मञ्जुलं त्रिषु मञ्जौ [मनोज्ञे] ना जलरङ्कौ नपुंसकम् । जलाञ्चले निकुञ्जे [लताबहुले स्थाने] च " ।
—58. Hc : तरल: हारमध्यमणौ हारे च आभरणनामत्वात्पुंस्त्वम् ।
—60. कलि: cannot be the original reading as it occurs in verse 34.
—61. Hc : मानविशेषनाम—तूल: । वल्लभ adds : तूल इति पौतवं मानम् । उन्मानमिति दुर्ग: । वल्लभ in the 17th cent. of the विक्रमसंवत् thus knew and quoted the present text of the वृत्ति as दुर्ग's. The addendum of B, पिचुश्च, (cotton) is known to Hc : तूल: तूलं पिचु: अरुणस्य ।

Verse 34. —70. By केचित् probably अमर is referred to . "पल्लवोऽस्त्री".
—71, 72. अमर has सृमरो गवय: शश: on which is based the reading of B. सृमल and its sense अवयवपर्याय: are unknown to Amara, Hr, Hc, MW. Hc has : मरुन्नाम—सृमर: ... । तत्प्रभेदनाम—अपान: प्राण: ... । वल्लभ explains अपान etc. as देहवायव: । Are we to accept the reading of B and regard अवयवपर्याय: as a confusion of देहवायव: ?
—77. Hc has बिडा which वल्लभ explains by ओषधिविशेष: ।
—78. Vide verse 27.

Verse 37. —1, 31. Inspite of the unanimous ms. evidence गुल्म is emended into गुल्फ. For, (1) its synonyms mean 'ankle', and (2) गुल्म is not included in the sense-categories by any Ling. while गुल्फनाम is *m* according to all except Vm.
—33. घुट: (and not पुट:) is accepted on the authority of Amara : द्वयोर्गुल्फा द्वयोर्घुटा ।
—36 to 38. Words with penultimate ल़ are taught to be *n* in verse 54. गल however is *m*.
